# चतुर्दशः पाठः

*पञ्चतन्त्रं नीतियुतानां सरल-सरस-सदुपदेशात्मिकानां कथानां संग्रहोऽस्ति। पञ्चतन्त्रस्य रचना पण्डित विष्णुशर्मणा सरलोपायेन नीतिज्ञानप्रदानाय कृता। स्वाद्भुत-भाषा-शैल्या: अयं ग्रन्थ: विश्वस्मिन् जगति प्रसिद्धोऽस्ति। संसारस्य नैकासु भाषासु अस्यानुवादो लभ्यते।*

*पञ्चतन्त्रनामात्मकेऽस्मिन् ग्रन्थे पञ्चतन्त्राणि सन्ति — १. मित्रभेद: २. मित्रसम्प्राप्ति: ३. काकोलूकीयम् ४. लब्धप्रणाश: ५. अपरीक्षित-कारकञ्चेति।*

*प्रस्तुतोऽयं पाठ: पञ्चतन्त्रस्य चतुर्थतन्त्रस्य लब्धप्रणाशस्य प्रथमाया: कथाया: सार: वर्तते। अस्मिन् पाठे गङ्गदत्तनामक: मण्डूक: कदाचिद् स्वीयजनै: अपमानित: सन् प्रतिशोधभावनया तेषां प्रत्यपकाराय प्रियदर्शनं नाम सर्पं आह्वयति। सर्पश्च सर्वान् बन्धुवर्गान् भक्षयति। तत्रान्तरे सर्वेषां बन्धुवर्गाणां समाप्तौ सति स: सर्प: गङ्गदत्तस्य शिशूनपि भक्षयति। कथा सन्दिशति — यया दुष्टतया गङ्गदत्तेन स्वबान्धवा: हता:, तया एव तस्य पुत्रा: अपि कालकवलिता:। उक्तं हि-''यो यद्वपति बीजं हि लभते तादृशं फलम्।''*

## यो यद्वपति बीजं हि लभते तादृशं फलम्

कस्मिंश्चिद् कूपे गङ्गदत्तो नाम मण्डूक: प्रतिवसति स्म। स कदाचिद् दायादै: उद्वेजित: अरघट्टघटीम् आरुह्य निष्क्रान्त:। अथ तेन चिन्तितं यत् ''कथं तेषां दायादानां मया प्रत्यपकार: कर्त्तव्य: ?'' एवं चिन्तयन् बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत्। तं दृष्ट्वा भूयोऽप्यचिन्तयत् यत् ''एनं तत्र कूपे नीत्वा सकलदायादानाम् उच्छेदं करोमि।''

एवं विभाव्य बिलद्वारं गत्वा तम् आहूतवान् — एहि, एहि प्रियदर्शन, एहि! तच्छ्रुत्वा सर्पोऽचिन्तयत्- ''य एष: माम् आह्वयति, न स स्वजातीय:। यतो नैषा सर्पवाणी। तदत्रैव दुर्गे स्थितस्तावद् वेद्मि-कोऽयमिति ?'' आह च- 'भो: को भवान् ?' स आह-''भो: गङ्गदत्तो नाम मण्डूकाधिपति: त्वत्सकाशे मैत्र्यर्थमभ्यागत:।'' तच्छ्रुत्वा सर्प आह- ''भो अश्रद्धेयमेतत् यत् तृणानां वह्निना सह संगम:।''

गङ्गदत्त आह-''भो: सत्यमेतत्। स्वभाववैरी त्वमस्माकं, परं परपरिभवात् प्राप्तोऽहं ते सकाशम्।'' सर्प आह-''कथय, कस्मात्ते परिभव: ?'' स आह-''दायादेभ्य:''। सोऽप्याह-''क्व ते आश्रय:, कूपे, तडागे, ह्रदे वा ? तत् कथय स्वाश्रयम्।'' तेनोक्तम्-''पाषाणचयनिबद्धे कूपे''। सर्प आह-''अपदा वयम्। तन्नास्ति मे तत्र प्रवेश:। प्रविष्टस्य च, स्थानं नास्ति, यत्र स्थितस्तव दायादान् व्यापादयामि। तद् गम्यताम्।''

गङ्गदत्त आह-''भो: समागच्छ त्वम्। अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि। तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति तत्र स्थितस्त्वं लीलया दायादान्-व्यापादयिष्यसि।''

तच्छ्रुत्वा सर्पो व्यचिन्तयत्–"अहं तावत् परिणतवयः कदाचित् कथञ्चिन्मूषकमेकं प्राप्नोमि। तत् सुखावहो जीवनोपायोऽयमनेन कुलाङ्गारेण मे दर्शितः। तद् गत्वा तान् मूषकान् भक्षयामि" इति।

एवं विचिन्त्य तमाह–"भो गङ्गदत्त! यद्येवं तदग्रे भव, येन तत्र गच्छावः।" गङ्गदत्त आह–"भोः प्रियदर्शन! अहं त्वां सुखोपायेन तत्र नेष्यामि, स्थानं च दर्शयिष्यामि। परं त्वयाऽस्मत्परिजनो रक्षणीयः। केवलं यानहं तव दर्शयिष्यामि, त एव भक्षणीयाः" इति। सर्प आह–"साम्प्रतं त्वं मे मित्रं जातम्। तन्न भेतव्यम्। तव वचनेन भक्षणीयास्ते दायादाः।" एवमुक्त्वा बिलान्निष्क्रम्य तमालिङ्ग्य च, तेनैव सह प्रस्थितः।

अथ कूपम् आसाद्य अरघट्टघटिकामार्गेण सर्पस्तेन सह तस्यालयं गतः। ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे धृत्वा दर्शितास्ते दायादाः। ते च तेन शनैः शनैर्भक्षिताः। अथ मण्डूकाभावे सर्पेणाभिहितम्– "भद्र, निःशेषितास्ते रिपवः। तत् प्रयच्छान्यन्मे किञ्चित् भोजनं यतोऽहं त्वयात्रानीतः।" गङ्गदत्त आह–'भद्र, कृतं त्वया मित्रकृत्यं, तत्साम्प्रतमनेनैव घटिकायन्त्रमार्गेण गम्यताम्' इति। सर्प आह–"भो गङ्गदत्त, न सम्यगभिहितं त्वया। कथमहं तत्र गच्छामि? मदीयं बिलदुर्गमन्येन रुद्धं भविष्यति। तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ। नो चेत् सर्वानपि भक्षयिष्यामि" इति।

तच्छ्रुत्वा गङ्गदत्तो व्याकुलमना व्यचिन्तयत्–"अहो, किमेतन्मया कृतं सर्पमानयता? तद् यदि निषेधयिष्यामि तत् सर्वानपि भक्षयिष्यति।"

एवं चिन्तयतस्तस्य तेन सर्पेण शनैः शनैः सकलमपि मण्डूककुलं यथाकालं कवलितम्।

साध्विदमुच्यते– यो यद् वपति बीजं हि लभते तादृशं फलम्।

## शब्दार्थाः

**दायादैः** — स्ववंशीयजनैः (अपने कुटुम्बियों के द्वारा)। **उद्वेजितः** — क्षुब्धः (तंग किया गया)। **अरघट्टघटीम्** — अरहटडोलिकाम् (रहट में प्रयोग किया जाने वाला डोला)। **प्रत्यपकारः** — अपकारस्य प्रतिकारः (अपकार का बदला)। **उच्छेदम्** — विनाशम् (विनाश)। **विभाव्य** — विचार्य (विचार करके)। **वह्निना** — अग्निना (अग्नि का)। **सकाशम्** — निकटम् (निकट)। **परपरिभवात्** — परैः कृतापमानात्/तिरस्कारात् (दूसरे के द्वारा किये अपमान से)। **वाप्याम्** — (वापी में)। **कूपे** — (कुएँ में)। **तडागे** — (तालाब में)। **ह्रदे** — गभीरे जलाशये (गहरे जलाशय में)। **पाषाणचयनिबद्धे** — पाषाणखण्डैः निबद्धः (कूपः) तस्मिन् (पत्थरों के समूह से बने हुए में)। **अपदाः** — पदरहिताः (पैरों से हीन=सर्प)। **व्यापादयामि** — घातयामि (मारता हूँ)। **जलोपान्ते** — जलस्य निकटे (जल के पास)। **कोटरम्** — निष्कुहः (खोखल)। **परिणतवयाः** — वृद्धाः (परिणतं वयः यस्य असौ) (बूढ़ा)। **सुखावहः** — सुखकरः (सुखकारी)। **जीवनोपायं** — जीविकायाः उपायम् (जीविका का उपाय)। **कुलाङ्गारेण**- कुलस्य नाशकेन (कुलनाश के लिये अंगार के समान)। **अभिहितम्** — कथितम् (कहा)। **निःशेषिताः** — समाप्ताः (समाप्त कर दिये)। **रिपवः** — शत्रवः (शत्रु)। **स्ववर्गीयम्** — स्वपरिजनम् (कुटुम्बीजन को)। **व्याकुलमना** — व्यग्रमना (व्याकुल मन वाला)। **कवलितम्** — भक्षितम् (खा लिया)।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. मण्डूकराजस्य नामासीत् —

(अ) गङ्गदत्तः (आ) भुजङ्गदत्तः

(इ) मण्डूकराजः (ई) प्रियदर्शनः ( )

२. मण्डूकराजः कैः उद्वेजितः —

(अ) सर्पैः (आ) खगैः

(इ) दायादैः (ई) पुत्रैः ( )

३. "अहं तावत् परिणतवयाः कदाचित् कथञ्चिन्मूषकमेकं प्राप्नोमि" इति कः अचिन्तयत् —

(अ) मूषकः (आ) मण्डूकः

(इ) चित्रग्रीवः (ई) सर्पः ( )

४. "यो यद्वपति बीजं हि लभते तादृशं फलम्" इति पाठः संकलितोऽस्ति —

(अ) हितोपदेशात् (आ) जातकमालातः

(इ) मित्रभेदात् (ई) लब्धप्रणाशात् ( )

**लघूत्तरात्मकप्रश्नाः**

१. प्रियदर्शनः कः आसीत्?

२. गङ्गदत्तस्य परिभवः कैः कृतः?

३. कूपे सर्पः कुत्र स्थितः?

४. गङ्गदत्तस्य आश्रयः क्व आसीत्?

५. सर्पः केन मार्गेण गङ्गदत्तस्यालयं गतः?

**निबन्धात्मक-प्रश्नाः**

१. दायादानां प्रत्यपकाराय गङ्गदत्तः किं कृतवान्?

२. बिलद्वारं प्राप्तं गङ्गदत्तं सर्पः किम् उक्तवान्?

३. कूपे नीयमानं सर्पं गङ्गदत्तः किम् उक्तवान्?

४. मण्डूकाभावे गङ्गदत्ताय सर्पेण किम् अभिहितम्?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (अ) २. (इ) ३. (आ) ४. (ई)

**व्याकरणात्मक-प्रश्नाः**

१. अधोलिखितेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत —

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| उदा. | अस्ति | अस् | लट् | प्रथमः | एकवचनम् |
| | अपश्यत् | ....... | ....... | ....... | ....... |
| | करोमि | ...... | ....... | ....... | ....... |
| | वेद्मि | ...... | ....... | ....... | ....... |
| | व्यापादयामि | ...... | ....... | ....... | ....... |
| | अचिन्तयत् | ...... | ....... | ....... | ....... |
| | प्राप्नोमि | ...... | ....... | ....... | ....... |
| | भक्षयामि | ...... | ....... | ....... | ....... |
| | दर्शयिष्यामि | ...... | ....... | ....... | ....... |
| | गच्छामि | ...... | ....... | ....... | ....... |

२. अधोलिखितपदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत —

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| उदा. | कूपे | कूप | सप्तमी | एकवचनम् |
| | माम् | ...... | ....... | ............. |
| | तेन | ...... | ....... | ............. |
| | दायादान् | ...... | ....... | ............. |
| | लीलया | ...... | ....... | ............. |
| | रिपवः | ...... | ....... | ............. |
| | त्वाम् | ...... | ....... | ............. |
| | प्रविष्टस्य | ...... | ....... | ............. |
| | मया | ...... | ....... | ............. |

३. अधोलिखितपदेषु सन्धि-विच्छेदं प्रदर्शयत —

| | पदम् | सन्धि-विच्छेदः |
|---|---|---|
| उदा. | प्रत्यपकारः | प्रति + अपकारः |
| | दायादैरुद्वेजितः | ..................... |
| | भूयोऽपि | ..................... |
| | अत्रैव | ..................... |
| | मैत्र्यर्थम् | ..................... |
| | तच्छ्रुत्वा | ..................... |
| | सर्पस्तेन | ..................... |

४. अधोलिखित-पदानाश्रित्य वाक्यनिर्माणं कुरुत —

| | पदम् | - | वाक्यम् |
|---|---|---|---|
| उदा. | कदाचित् | - | रामः कदाचित् मित्रैः रोषितः। |
| | कूपम् | - | ..................................... |
| | तत्र | - | ..................................... |
| | रिपवः | - | ..................................... |
| | सर्पेण | - | ..................................... |

५. अधोलिखितेषु समस्तपदेषु नामनिर्देशसहितं समासविग्रहो विधेयः —

| | पदम् | - | समास विग्रहः | समासनाम |
|---|---|---|---|---|
| उदा. | कृष्णसर्पः | - | कृष्णश्च असौ सर्पश्च | कर्मधारयः |
| | प्रियदर्शनः | - | ............................ | ................ |
| | पाषाणचयनिबद्धे | - | ............................ | ................ |
| | घट्टिकायन्त्रमार्गेण | - | ............................ | ................ |
| | व्याकुलमनाः | - | ............................ | ................ |
| | मण्डूकराजः | - | ............................ | ................ |

६. निम्नलिखितेषु पदेषु प्रकृति-प्रत्ययं प्रदर्शयत —

| | पदम् | धातुः ( प्रकृतिः ) | + | प्रत्ययः |
|---|---|---|---|---|
| उदा. | श्रुत्वा | श्रु | + | क्त्वा |
| | कर्त्तव्यः | .............. | + | .............. |
| | आहूतवान् | .............. | + | .............. |
| | उक्तम् | .............. | + | .............. |

७. अधोलिखितान् वाक्यान् अधीत्य प्रश्न-निर्माणं कुरुत —

उदा. वाक्यम्- गङ्गदत्तः कूपे प्रतिवसति स्म।

प्रश्नः- गङ्गदत्तः कुत्र प्रतिवसति स्म ?

वाक्यम्- सः कदाचिद् दायादैः उद्वेजितः।

प्रश्नः- .................................................................

वाक्यम्- सः बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत्।

प्रश्नः- .................................................................

वाक्यम्- सर्पोऽचिन्तयत्-''अहं तावत् परिणतवयाः''।

प्रश्नः- .................................................................

वाक्यम्- गङ्गदत्तः प्रियदर्शनमाह-''केवलं यानहं दर्शयिष्यामि, त एव भक्षणीयाः।''

प्रश्नः- .................................................................

# पञ्चदशः पाठः

विश्ववाङ्मये वैदिक साहित्यस्य महत्त्वपूर्णं स्थानमस्ति। वैदिक साहित्ये चत्वारः वेदाः, तेषां व्याख्यारूपाः ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषदश्च सन्ति। तत्र अष्टोत्तर-एकशतानां (१०८) उपनिषदां परिगणनम् अस्ति। परन्तु प्रमुखाणां दश-उपनिषदां पठनं-पाठनं सर्वत्र एव भवति।

**ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।**
**ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश॥**

प्रस्तुतपाठः तैत्तिरीयोपनिषदः शीक्षा-वल्लीतः उद्धृतः अस्ति। विद्यासमाप्त्यनन्तरं छात्रस्य समावर्तन-संस्कारस्य अवसरे आचार्यः शिष्यं उपदिशति। तस्यैव वर्णनं 'शीक्षावल्ली' इत्यत्र अस्ति। अस्मिन् पाठे तस्यैव सारांशस्य उल्लेखः अस्ति।

## आचार्योपदेशः

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद! धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव! पितृदेवो भव! आचार्यदेवो भव! अतिथिदेवो भव! यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यानि अस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। श्रद्धया देयम्। अश्रद्धयादेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।**

### पदच्छेदः

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति**- वेदम्+ अनूच्य+ आचार्यः+ अन्तेवासिनम्+ अनुशास्ति, **स्वाध्यायान्मा**- स्वाध्यायात्+ मा, **सत्यान्न**- सत्यात्+ न, **धर्मान्न**- धर्मात्+ न, **कुशलान्न**- कुशलात्+न, **अश्रद्धयादेयम्**- अश्रद्धया+ देयम्/अदेयम्, **एतदनुशासनम्**- एतत्+ अनुशासनम्, **एवमुपासितव्यम्**- एवम्+ उपासितव्यम्।

### कठिनशब्दार्थाः

**वेदम्**- ज्ञानराशिम्, **अनूच्य**- अध्याप्य, अध्यापनं कृत्वा (अनु+वच्+ल्यप्), **आचार्यः**- गुरुः, **अन्तेवासिनम्**- शिष्यम्, **अनुशास्ति**- उपदिशति, **चर**- आचरणं कुरु, **मा**- न, **प्रमदः**- प्रमादं कुरु, **प्रमदितव्यम्**- प्रमादं करणीयम्, **धर्मात्**- कर्त्तव्यकर्मणः, **कुशलात्**- आत्मरक्षणकर्मणः, **भूत्यै**- ऐश्वर्यकर्मणः,

**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्**- नियमेन स्वाध्यायः प्रवचनं च अवश्यमेव करणीयम्, **मातृदेवः, पितृदेवः, आचार्यदेवः, अतिथिदेवः भव**- मात्रादयः देवाः यस्य स त्वं भव अर्थात् एते देवतावत्त्वया उपास्याः, **अनवद्यानि**- अनिन्दनीयानि अथवा प्रशंसनीयानि कर्माणि, (वदितुं योग्यं वद्यं, न वद्यम् अवद्यम्, न अवद्यम् इति अनवद्यम्, तानि), **सेवितव्यानि**- सेवनं करणीयम्, **सुचरितानि**- सुकर्माणि, **इतराणि**- अन्यानि, **श्रद्धया**- श्रद्धापूर्वकम्, **देयम्**- दातव्यम्, **अदेयम्**- कदापि न दातव्यम्, **ह्रिया**- मत्तुल्याः मदवराश्च अपि दास्यन्ति इति लज्जया वा देयम्, **भिया**- पारलौकिक-भयेन वा देयम्, **संविदा**- संवित् मित्रादिकार्यम् तया वा देयम्, **आदेशः** - विधिः, **एष उपदेशः** - पित्रादीनां पुत्रादिभ्यः एष एव उपदेशः, **एषा वेदोपनिषद्**- एतस्य वेदरहस्यार्थत्वात्, **अनुशासनम्**- ईश्वरवचनम् एतत् सर्वप्रमाणानाम् अनुशासनम्।

## अभ्यास-प्रश्नाः

**अतिलघूत्तरात्मक-प्रश्नाः**

१. रिक्त स्थानानि पूरयतु -

(१) श्रद्धया ..........।

(२) अश्रद्धया ........।

(३) आचार्यदेवो .....।

(४) स्वाध्याय-प्रवचनाभ्यां ......।

**लघूत्तरात्मक-प्रश्नाः**

१. श्रद्धया किं करणीयम्?

२. धर्मात् किं न करणीयम्?

३. कीदृशानि कर्माणि सेवितव्यानि?

४. कानि त्वया उपास्यानि?

**निबन्धात्मक-प्रश्नाः**

१. केषु केषु कार्येषु कदापि प्रमादः न करणीयः?

२. दानस्य विषये शिक्षावल्यां यल्लिखितं तत् वर्ण्यताम्।

**व्याकरणात्मक-प्रश्नाः**

१. अधोलिखित पदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत-

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| उदा. | वद | वद् | लोट् | मध्यमः | एकवचनम् |
| | १. चर | ..... | ..... | ..... | ..... |
| | २. भव | ..... | ..... | ..... | ..... |
| | ३. गच्छ | ..... | ..... | ..... | ..... |
| | ४. जिघ्र | ..... | ..... | ..... | ..... |

२. निम्नलिखितेषु शब्द-लिङ्ग-विभक्ति-वचनानां निर्देशं कुरुत-

| | पदम् | शब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| उदा. | स्वाध्यायात् | स्वाध्याय | पुल्लिङ्गः | पञ्चमी | एकवचनम् |
| | १. श्रद्धया | ..... | ..... | ..... | ..... |
| | २. धर्मात् | ..... | ..... | ..... | ..... |

| | | | | |
|---|---|---|---|---|
| ३. भिया | ..... | ..... | ..... | ..... |
| ४. ह्रिया | ..... | ..... | ..... | ..... |
| ५. सुचरितानि | ..... | ..... | ..... | ..... |
| ६. कर्माणि | ..... | ..... | ..... | ..... |

३. अधोलिखितेषु प्रत्ययस्य निर्देशं कुरुत-

| | | |
|---|---|---|
| उदा. | प्रमदितव्यम् | प्र+मद्+तव्यत् |
| १. | सेवितव्यानि | सेव्+ ............ |
| २. | देयम् | दा+ .............. |
| ३. | युक्तः | युज्+ ............ |
| ४. | वचनम् | वच्+ ............ |

४. निम्नाङ्कितेषु उपसर्गस्य निर्देशं कुरुत-

| | | |
|---|---|---|
| उदा. | प्रवचनम् | प्र+ वचनम् |
| १. | प्रमादः | .............. |
| २. | आदेशः | .............. |
| ३. | उपदेशः | .............. |
| ४. | सुचरितानि | .............. |
| ५. | अनुशासनम् | .............. |

५. अधोलिखितपदानां एकवचनं लिखत-

| | | |
|---|---|---|
| उदा. | सुचरितानि | सुचरितम् |
| | १. कर्माणि | .............. |
| | २. तानि | .............. |
| | ३. यानि | .............. |
| | ४. अनवद्यानि | .............. |
| | ५. लताः | .............. |
| | ६. नामानि | .............. |

६. क-खण्डं ख-खण्डेन सह योजयत-

| **क** | **ख** |
|---|---|
| सत्यं | भव |
| आचार्यदेवो | वद |
| धर्मं | न प्रमदितव्यम् |
| श्रिया | चर |
| कुशलात् | देयम् |

# अपठितावबोधनम्

अधोलिखित-गद्यांशान् पठित्वा तदाधारित-प्रश्नानाम् उत्तराणि यथानिर्देशं लिखन्तु।

## ( १ )

यदि वयं समाजे राष्ट्रे वा परिवर्तनम् आनेतुम् इच्छामः तर्हि अस्माकं प्रभावः अन्येषाम् उपरि भवेत्। वयं बाह्यवातावरणेन कुप्रभाविताः न स्याम, अपितु वातावरणस्य उपरि अस्माकं प्रभावः स्यात्। अत्र काचित् एका कथा एवमस्ति-

कश्चन कृषकः महिष्याः अस्वास्थ्य-निवारणाय कञ्चित् पशुवैद्यम् औषधं पृष्टवान्। वैद्यः गुलिकाः दत्तवान्, किञ्च उक्तवान् यत् एकस्यां नलिकायां गोलिकाः स्थापयित्वा भवान् स्वमुखेन वायुं फूत्करोतु, तदा गुलिकाः महिष्याः उदरं गमिष्यन्ति इति। कृषकः अस्तु इति उक्त्वा गतवान्। दिनद्वयानन्तरं सः वैद्यः तं कृषकं मार्गे अस्वस्थरूपेण गच्छन्तं दृष्टवान्। किं सञ्जातमिति पृष्टे सति सः कृषकः उक्तवान् — तया नलिकया अहं फूत्करोमि ततः पूर्वं महिष्या एव फूत्कृतम्, परिणामतः गुलिकाः मम उदरं गताः। इति। अनया कथया बोध्यते यत् बाह्यवातावरणस्य कुप्रभावः येषाम् उपरि न भवति, ते एव सफलाः भवन्ति। नेतारः, मार्गदर्शकाः, समाजशोधकाः च बाह्यं दूषितं वातावरणं परिवर्तयन्ति, न तु स्वयं तेन दूषितेन वातावरणेन प्रभाविताः भवन्ति।

**प्रश्नाः**

१. अस्य गद्यावतरणस्य समुचितं शीर्षकं लिखन्तु।
२. अस्माकं प्रभावः कुत्र स्यात्?
३. उपर्युक्ता कथा किं बोधयति?
४. गुलिकाः कस्य उदरे गताः?
५. कः कं पृष्टवान् औषधम्?
६. ''कृषकः अस्तु इति उक्त्वा गतवान्''-अस्मिन् वाक्ये कर्तृपदम् किमस्ति?
७. 'अगच्छत्' इति पदस्य समानार्थकं पदं गद्यांशात् अन्विष्य लिखन्तु।
८. 'नेतुम्' इति पदस्य विलोमपदं गद्यांशात् अन्विष्य लिखन्तु।

**उत्तराणि**

१. अस्माकं प्रभावः वातावरणस्योपरि
२. वातावरणस्योपरि, अन्येषाम् उपरि वा

३. यत् बाह्यवातावरणस्य कुप्रभाव: येषाम् उपरि न भवति ते एव सफला: भवन्ति
४. कृषकस्य
५. कृषक:, पशुवैद्यम्
६. कृषक:
७. गतवान्
८. आनेतुम्

## ( २ )

मातृभूमिं प्रति प्रेम्ण:, त्यागस्य, आत्मोत्सर्गस्य, सर्वस्वार्पणस्य च नैके समुज्ज्वला: पृष्ठा: राजस्थानस्य इतिहासे मिलन्ति परन्तु 'रातीघाटी' नामकस्य युद्धस्य उल्लेख: राजस्थानस्य इतिहासे लुप्तप्राय: वर्तते। बादशाह बाबर इत्यस्य पुत्र: (हुमायुँ: इत्यस्य अनुज:) कामरान: बीकानेरस्य राजा राव जैतसी च — इत्यनयो: द्वयो: मध्ये बीकानेरे घटितं महत्युद्धं भारतीय-शौर्यस्य गौरवशालिनी कथा अस्ति। अस्य युद्धस्य तिथि: २६ ओक्टोबर १५३४ ईस्वी इत्यस्ति। भारतं जेतुम् लाहोरात् आगत: कामरान: पलायित:। तस्य शिरस्त्राणं (मुकुटम्) मध्येमार्गं 'छोटड़िया' ग्रामे पतितम्। अद्यापि तन्मुकुटम् तद्ग्रामे सुरक्षितम् अस्ति। अस्य रातीघाटी-युद्धस्य किञ्चिद् विस्तृतं वर्णनं 'बीठू सूजा' इत्यनेन रचिते 'छन्द राव जैतसी रो' इत्यस्मिन् ग्रन्थे वर्तते। अस्य च ग्रन्थस्य उद्धारं डॉ. एल.पी. टैस्सीटोरी अकरोत्।

**प्रश्ना:**

१. अस्य अनुच्छेदस्य समीचीनं शीर्षकं लिखन्तु।
२. रातीघाटी-युद्धं कयो: द्वयो: मध्येऽभवत्?
३. रातीघाटी-युद्धं कुत्र कदा च घटितम्?
४. 'छन्द राव जैतसी रो' इत्यस्य लेखक: क:?
५. गौरवशालिनी कथा-इत्यत्र किं विशेष्यपदं किं च विशेषणपदम् इति लिख्यताम्।
६. 'धावित:' इत्यस्य पर्यायवाचिनं पदम् अनुच्छेदात् अन्विष्य लिख्यताम्।

**उत्तराणि**

१. ऐतिहासिकं रातीघाटी-युद्धम्।
२. कामरान: राव जैतसी च — इत्यनयो: मध्ये।
३. बीकानेरे, २६ ओक्टोबर् १५३४ ए.डी.।
४. बीठू सूजा।
५. **विशेष्यपदम्**-कथा। **विशेषणपदम्**- गौरवशालिनी।
६. आगत:।
७. पलायित:।

## ( ३ )

अस्ति केरले-प्रान्ते कालडीनामको ग्रामः। स च पूर्णा- (पेरियार्) नदीतीरे वर्तते। जगद्गुरुः श्रीशंकराचार्यः तस्मिन् ग्रामे जन्म अलभत्। अस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। शंकरस्य जन्मनः प्रागेव पिता दिवङ्गतः। मातैव पुत्रस्य पालनम् अकरोत्। यथाकालम् उपनीतः सः गुरुमुपागच्छत्। जन्मनैव प्रतिभा-सम्पन्नतया असौ कुलोचिताः विद्याः शीघ्रमेव अधीतवान्।

माता तं गृहस्थं कर्तुमैच्छत्। परन्तु मनसा वचसा कर्मणा च विरक्तः शंकरः प्रार्थयत् - 'मातः! संन्यासः मह्यं रोचते, तदर्थम् अनुमतिं प्रयच्छ' इति। माता पुत्रस्य प्रार्थनां न स्वीकृतवती। एकदा स्नातुं नदीं गतः शंकरः नक्रेण गृहीतः उच्चैः आक्रोशत्। आक्रोशं श्रुत्वा नदीतीरं गता माता पुत्रं नक्रेण गृहीतम् अपश्यत्। शंकरः मातरमवदत् - अम्ब! यदि संन्यासं स्वीकर्तुम् अनुमंस्यसे तर्हि अहं नक्रात् मुक्तो भविष्यामि इति। चेतसा अनिच्छन्ती अपि विवशा माता - 'वत्स! यथा तुभ्यं रोचते तथा कुरु' इति कष्टेन अकथयत्। सद्यः नक्रात् मुक्तः शंकरः मातुः चरणयोः प्रणामम् अकरोत्। माता च तम् अनुगृहीतवती। 'मातः! तव स्मरणक्षणे एव तव समीपम् आगमिष्यामि' इति प्रतिज्ञाय सः गृहात् निरगच्छत्। देशाद्देशं पर्यटन् सः नर्मदातटं प्राप्तवान्। तत्र सः गोविन्द-पादाचार्येभ्यः वेदान्त-विद्याम् अधीतवान्।

अनन्तरं सः मुख्यानाम् उपनिषदां, व्यास-प्रणीतानां ब्रह्मसूत्राणां, श्रीमद्भगवद्गीतायाः च भाष्याणि रचितवान्। एतेन संस्कृतस्य महान् उपकारः अजायत। ततः सः आसेतुहिमाचलं स्वस्य सिद्धान्तस्य प्रचारम् अकरोत्। मातुः अन्तकाले च तया स्मृतः शंकरः तत्समीपम् आगच्छत्।

अद्वैत-सिद्धान्तस्य प्रचाराय परिरक्षणाय च श्रीशंकरः द्वारकायाम्, बदर्याम्, जगन्नाथपुर्यां, शृंगेर्यां च चतुरः मठान् समस्थापयत्। तेषाम् अधिष्ठातारः अद्यापि 'शंकराचार्याः' इति कथ्यन्ते।

श्रीशंकराचार्येण विरचितानि बहूनि स्तोत्रकाव्यानि अपि सन्ति। तेषु च 'भजगोविन्दम्' इति भजनम् अतीव लोकप्रियम् अस्ति।

**प्रश्नाः**

१. प्रस्तुतस्य अनुच्छेदस्य योग्यं शीर्षकं लिखन्तु।
२. शंकराचार्यस्य जन्म कुत्र अभवत्?
३. गृहात् निर्गमन-काले शंकरः मातुः पुरतः किं प्रतिज्ञातवान्?
४. शंकरः चतुरः मठान् कुत्र अस्थापयत्?
५. एतेन संस्कृतस्य महान् उपकारः अजायत- इति वाक्ये किं कर्तृपदं किं च क्रियापदम्?
६. कर्तृक्रियान्वितिः अत्र करणीया —

| कर्तृपदानि | क्रियापदानि |
|---|---|
| १. माता | आगमिष्यामि |
| २. पिता | कथ्यन्ते |
| ३. अहम् | आस्ताम् |
| ४. शंकराचार्याः | स्वीकृतवती |
| ५. माता पिता च | दिवंगतः |

७. अत्र विशेषण-विशेष्यान्वितिः करणीया —

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| १. लोकप्रियम् | शंकरः |
| २. विरक्तः | भजनम् |
| ३. अनिच्छन्ती | माता |
| ४. स्वस्य | सिद्धान्तस्य |

८. 'परिभ्रमन्' इत्यस्य समानार्थकं पदम् अनुच्छेदात् अन्विष्य लिखन्तु।

९. 'बद्धः' इत्यस्य विलोम-पदं अनुच्छेदात् अन्विष्य लिख्यताम्।

**उत्तराणि**

१. जगद्गुरुः शंकराचार्यः।

२. केरले-प्रान्ते कालडी-नामके ग्रामे।

३. मातः! तव स्मरण-क्षणे एव तव समीपम् आगमिष्यामि, इति।

४. द्वारकायाम्, बदर्याम्, जगन्नाथपुर्याम्, शृङ्गेर्याम् च।

५. **कर्त्ता**- उपकारः, **क्रिया**- अजायत

६.

| | | |
|---|---|---|
| १. माता | - | स्वीकृतवती |
| २. पिता | - | दिवंगतः |
| ३. अहम् | - | आगमिष्यामि |
| ४. शंकराचार्याः | - | कथ्यन्ते |
| ५. माता पिता च | - | आस्ताम् |

७.

| | | |
|---|---|---|
| १. लोकप्रियम् | - | भजनम् |
| २. विरक्तः | - | शंकरः |
| ३. अनिच्छन्ती | - | माता |
| ४. स्वस्य | - | सिद्धान्तस्य |

८. पर्यटन्

९. मुक्तः

## ( ४ )

डॉ. भीमराव-आम्बेडकर: संस्कृतं पठितुम् इष्टवान् आसीत्, परन्तु स: अस्पृश्य: इति कारणत: कश्चन संस्कृतज्ञ: आम्बेडकरं संस्कृतं पाठयितुं निराकृतवान् — इति विषय: तु आम्बेडकर-महोदयस्य जीवनसम्बन्धि-पुस्तकेषु लिखित: अस्ति; स: विषय: तु प्रचारे अपि अस्ति। 'भारतस्य राजभाषा संस्कृतं भवेत्' इति संविधानसभायां संशोधन-प्रस्ताव: आनीत: आसीत्, यस्य प्रस्तावस्य हस्ताक्षर-कर्तृषु प्रस्तावोपस्थापकेषु च डॉ. आम्बेडकर: अपि अन्यतम: आसीत्। अयं विषय: अपि कतिपयवर्षेभ्य: पूर्वं ज्ञात: आसीत्। परम् इदानीं कश्चन नूतन: विषय: प्रकाशम् आगत: अस्ति। नवप्राप्त-प्रमाणै: ज्ञायते यत् डॉ. आम्बेडकर: न केवलं संस्कृतस्य राजभाषात्वं समर्थितवान्, न केवलं स: संस्कृतं जानाति स्म, अपितु स: संस्कृतेन भाषते स्म इति! यत: संविधानसभायां यदा राजभाषा-सम्बन्धे चर्चा प्रवर्तते स्म तदा डॉ. आम्बेडकर: पण्डितलक्ष्मीकान्त-मैत्रेण सह संस्कृतेन वार्तालापं कृतवान्। तत्सम्बन्धे तत्कालीनेषु वार्तापत्रेषु प्रमुखतया वार्ता: प्रकाशिता: आसन्।

**प्रश्ना:**

१. उपर्युक्त-गद्यांशस्य उपयुक्तं शीर्षकं लिखन्तु।
२. डॉ. भीमराव आम्बेडकर: कां भाषां भारतस्य राजभाषां कर्तुम् इष्टवान्?
३. डॉ. आम्बेडकर: संविधान-सभायां केन सह संस्कृतेन वार्तालापं कृतवान्?
४. 'वार्तापत्रेषु वार्ता: प्रकाशिता: आसन्'-इत्यस्मिन् वाक्ये कर्तृपदस्य, क्रियापदस्य, विशेषणस्य च निर्देश: करणीय:।
५. डॉ. आम्बेडकर: संस्कृतेन भाषते स्म — अत्र रेखाङ्कितस्य संज्ञापदस्य स्थाने सर्वनाम-पदस्य प्रयोग: कर्त्तव्य:।
६. 'पुरातन:' इति पदस्य विलोमपदं पाठात् चित्वा लिखन्तु।

**उत्तराणि**

१. संस्कृतभाषी डॉ. आम्बेडकर:
२. संस्कृत-भाषाम्
३. पण्डितलक्ष्मीकान्त-मैत्रेण सह
४. **कर्तृपदम्** - वार्ता:
   **क्रियापदम्** - आसन्
   **विशेषणपदम्** - प्रकाशिता:
५. स: संस्कृतेन भाषते स्म।
६. नूतन:

## ( ५ )

एकमुद्देश्यं लक्ष्यीकृत्य बहूनां जनानाम् ऐक्यभावनया कार्यकरणमेव संहतिः, संघः संगठनं वाऽभिधीयते। एकता मनुष्ये शक्तिमादधाति। एकतयैव देशः समाजो लोकश्च उन्नतिपथं प्राप्नुवन्ति। यस्मिन् देशे समाजे वा एकताऽस्ति, स एव देशः सकललोकसम्माननीयो भवति।

संसारे एकतायाः अतीवावश्यकता वर्तते। विशेषतः कलियुगेऽस्मिन् संहतिः कार्यसाधिका। यतो हि वर्तमाने काले यादृशं सामाजिकं राष्ट्रियं च जीवनमस्ति, तस्य निर्माणाय रक्षणाय च संगठनं परमावश्यकम्। अद्यत्वे संसारे यस्मिन् राष्ट्रे एकतायाः अभावोऽस्ति, तत् राष्ट्रं सद्य एव परतन्त्रतापाशबद्धं भवति। अस्माकं देशस्य पारतन्त्र्यम् अनया एव एकतया सहयोगेन वा विच्छिन्नं जातम्। महात्मना गान्धिमहोदयेन तथैवान्यैश्च देशभक्तैः भारतीयसमाजे सर्वत्र एकत्वभावनोदयेन पराधीनतापाशस्य छेदनं विहितम्। अधुना लोकतन्त्रात्मकमस्माकं राष्ट्रं संघटनबलेनैव स्वोन्नतिं विदधाति अत एवोच्यते- 'संघे शक्तिः कलौ युगे।'

**प्रश्नाः**

१. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
२. संघः केन भवति?
३. एकता मनुष्ये किमादधाति?
४. कः देशः लोकसम्माननीयो भवति?
५. अस्मिन् युगे कार्यसाधिका का अस्ति?
६. किं राष्ट्रं परतन्त्रतापाशबद्धं भवति?
७. 'यादृशं सामाजिकं राष्ट्रियं च जीवनम् अस्ति' — अत्र विशेषण-विशेष्य-निर्देशः करणीयः।
८. 'संगठनम्' इति पदस्य पर्यायपदद्वयं गद्यांशाद् अन्विष्य लिखन्तु।

**उत्तराणि**

१. संघे शक्तिः कलौयुगे।
२. एकमुद्देश्यं लक्ष्यीकृत बहूनां जनानाम् ऐक्यभावनया कार्यकरणेन एव संघः भवति।
३. शक्तिम् आदधाति।
४. यस्मिन् देशे एकताऽस्ति।
५. 'संहतिः' एव कार्यसाधिका अस्ति।
६. यस्मिन् राष्ट्रे एकताया अभावः अस्ति।
७. **विशेषण-पदानि** — यादृशम्, सामाजिकम्, राष्ट्रियम्। **विशेष्य-पदम** — जीवनम्।
८. संघः, संहतिः

## ( ६ )

इदं हि विज्ञानप्रधानं युगम्। 'विशिष्टं ज्ञानं विज्ञानम्' इति कथ्यते। अस्यां शताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो दरीदृश्यते। अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साहाय्यं नापेक्ष्यते। आवागमने, समाचारप्रेषणे, दूरदर्शने, सम्भाषणे, शिक्षणे, चिकित्साक्षेत्रे, मनोरंजनकार्ये, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि तथैवान्यकार्यकलापेषु विज्ञानस्य प्रभावस्तदपेक्षा च सर्वत्रैवानुभूयते।

सम्प्रति मानवः प्रकृतिं वशीकृत्य तां स्वेच्छया कार्येषु नियुङ्क्ते। तथाहि वैज्ञानिकैरनेके आविष्काराः विहिताः। मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः। तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निर्घृणं च। अयं च न विज्ञानस्य दोषः न वा परमाणुशक्तेरपराधः, पुरुषापराधः खलु एषः।

अतोऽस्य मानवकल्याणार्थमेव प्रयोगः करणीय।

**प्रश्नाः**

१. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
२. इदं युगं कीदृशम्?
३. विज्ञानम् किम् अस्ति?
४. कैः आविष्काराः विहिताः?
५. परमाणुशक्तेः कस्मिन् उपयोगो विहितः?
६. कः पुरुषापराधः?
७. इदं हि विज्ञानप्रधानं युगम् — अस्मिन् वाक्ये विशेषण-विशेष्य-सर्वनामपदानां निर्देशः कर्त्तव्यः।
८. अस्य मानवकल्याणार्थम् एव प्रयोगः करणीयः-अस्मिन् वाक्ये रेखाङ्कितसर्वनामपदस्य स्थाने संज्ञापदस्य प्रयोगं कुर्वन्तु।
९. वैज्ञानिकैः उपयोगः विहितः — अत्र कः कर्त्ता?

**उत्तराणि**

१. विज्ञानस्य महत्त्वम्।
२. विज्ञानप्रधानम् युगम्।
३. 'विशिष्टं ज्ञानं विज्ञानं' कथ्यते।
४. वैज्ञानिकैरनेके आविष्काराः विहिताः।
५. परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः।
६. परमाणुशक्तेः लोकध्वंसकार्यम् एव।
७. **विशेषणम्**- विज्ञानप्रधानम्, **विशेष्यः** - युगम्, **सर्वनाम्**- इदम्।
८. विज्ञानस्य अथवा परमाणोः
९. वैज्ञानिकैः

## ( ७ )

स्त्रियो हि मातृशक्तेः प्रतीकभूताःभवन्ति। निसर्गादेव तासु गृहस्थजीवनस्योत्तरदायित्वं बालकानां भरण-पोषणादिकस्य च दायित्वं समापतति। शिशौ संस्काराधानस्य, सदाचरणशिक्षणस्य, भर्तुः सहयोगस्य, पारिवारिकजनानां सेवायाः, समागतानामभ्यागतानां शुश्रूषायाः, लोकहितसम्पादनस्य च समग्रमपि कर्त्तव्यजातं स्त्रीषु निपतति। अतः स्त्रीणां कृते शिक्षायाः परमावश्यकता वर्तते। सुगृहिणी तदैव सा सम्भवति यदा सुशिक्षिता स्यात्, सुशिक्षयैव परिवारस्य समाजस्य राष्ट्रस्य च हितं सम्पादयितुं सा समर्था भवति।

गृहस्य सुशिक्षिता स्त्री सद्गृहिणी गृहलक्ष्मीः गृहस्वामिनी वा भवति, सैव मातृभूता सद्वंशं सन्नागरिकं च निर्मातुं प्रभवति। स्त्री एव समाजे धार्मिकसंस्काराणां सद्गुणादिकानां स्थापनां करोति। अतः समाजे राष्ट्रे वा स्त्रीणां समादरो मातृशक्तेश्च गौरवरक्षणं तदैव सम्भवति यदा ताः सुशिक्षिताः स्युः। 'मातृदेवो भव' इति कथनमपि तदैव सुसङ्गतं भवति। स्त्रीसमाजस्योन्नतिमेव विचिन्त्य मनुनापि कथितम् -

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।'

**प्रश्नाः**

१. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखन्तु।

२. मातृशक्तेः प्रतीकभूताः काः भवन्ति?

३. स्त्रीणां कृते कस्याः परमावश्यकता वर्तते?

४. मनुना किं कथितं नारीणां विषये?

५. सुशिक्षिता स्त्री गृहलक्ष्मीः भवति — इत्यस्मिन् वाक्ये रेखाङ्कितस्य संज्ञापदस्य स्थाने कस्यापि सर्वनामपदस्य प्रयोगं कृत्वा वाक्यं पुनः लिखन्तु।

६. विशेषण-विशेष्यान्वितिं कुर्वन्तु अत्र —

| **विशेषणपदम्** | **विशेष्यपदम्** |
|---|---|
| सुशिक्षिता | कर्त्तव्यजातम् |
| सुसङ्गतम् | स्त्री |
| समग्रम् | कथनम् |

७. शिक्षायाः आवश्यकता वर्तते- इत्यत्र कः कर्त्ता?

८. 'अनादरः', 'असङ्गतम्' — इत्यनयोः विलोमपदे पाठाद् गृहीत्वा लिखन्तु।

**उत्तराणि**

१. स्त्री शिक्षायाः महत्त्वम्/आवश्यकता।

२. स्त्रियः

३. शिक्षायाः

४. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

५. सुशिक्षिता सा गृहलक्ष्मीः भवति।

६. सुशिक्षिता- स्त्री
   सुसंगतम्- कथनम्
   समग्रम्- कर्त्तव्यजातम्
७. आवश्यकता
८. आदर: (समादर:), सङ्गतम्

## ( ८ )

यस्मिन् देशे तस्य जनजीवने च न प्रवहित देशभक्तिधारा, न संचरति जन्मभूमिप्रेम, तत्र सामाजिकजीवनं शुष्कं गौरवरहितञ्च मन्यते। इदमेवालक्ष्य अस्माकं देशे प्रत्यहं मातृभूमिस्तुतौ गीयते-

वन्दे मातरम्!
सुजलां सुफलां मलयजशीतलाम्।
शस्य-श्यामलां मातरम्, वन्दे मातरम्।।

वस्तुतोऽस्माकं जन्मभूमि: जन्मन: भूमि:। यथोक्तमपि-'माता भूमि: पुत्रोऽहं पृथिव्या:।' यथा जननी स्व-स्तन्येन अस्मान् पालयति, तथैव मातृभूमिरपि स्वकीयेन विविधेन वस्तुजातेन स्वाश्रयेण चास्माकं पालनं रक्षणञ्च करोति। मातु: स्नेहमये उत्सङ्गे यथा वयं लालितास्तथैव जन्मभूमे: क्रोडेऽस्माकं वयोवर्धनं भवति। अत: सततमस्माभि: प्राणार्पणेनापि मातृभूमेर्हितसम्पादनं विधेयम्। मातृभूमिहितमेव राष्ट्रियहितं, भारतभूमेश्च गौरवमेव राष्ट्रगौरवमित्यत्र नास्ति विभेद:। अत एव मातृभूमिवात्सल्यं भारतस्य समृद्ध्यर्थं स्वातंत्र्यरक्षणार्थञ्च परमावश्यकम्।

**प्रश्ना:**

१. अस्य अनुच्छेदस्य शीर्षकं लिखन्तु।
२. जननी अस्मान् केन पालयति?
३. अस्माभि: मातृभूमे: हित-सम्पादनं कथं विधेयम्?
४. 'अङ्के' (गोद में) इत्यस्य पर्यायवाचिनं पदं पाठात् चित्वा लिख्यताम्।
५. 'सुजलां सुफलां मलयजशीतलां शस्य-श्यामलां वन्दे मातरम्'- अस्मिन् वाक्ये विशेषण-विशेष्य-निर्देश: क्रियताम्।
६. 'अभेद:' इति पदस्य विलोम-पदं (विपरीतार्थकं पदम्) पाठाद् अन्विष्य लिखन्तु।
७. कर्तृ-क्रियान्वितिं कुर्वन्तु अत्र —
   (क) देशभक्तिधारा - पालयति
   (ख) अस्माभि: - विधेयम्
   (ग) जननी - वन्दे
   (घ) अहम् - प्रवहति

८. 'माता भूमिः पुत्रोऽहम् पृथिव्याः' — अत्र रेखाङ्कितस्य संज्ञापदस्य स्थाने सर्वनामपदस्य प्रयोगं कृत्वा वाक्यं पुनर्लिखन्तु।

**उत्तराणि**

१. मातृभूमि-भक्तिः/देशभक्तिः

२. स्व-स्तन्येन

३. प्राणार्पणेन अपि

४. उत्सङ्गे

५. **विशेषणपदानि** - सुजलां सुफलां, मलयजशीतलां, शस्य-श्यामलाम्।

**विशेष्य पदम्** - मातरम्

६. विभेदः

७.

(क) देशभक्तिधारा - प्रवहति

(ख) अस्माभिः - विधेयम्

(ग) जननी - पालयति

(घ) अहम् - वन्दे

८. माताभूमिः पुत्रोऽहम् अस्याः।

# व्याकरणम्

{अवधेयम् : व्याकरणात्मकेऽस्मिन् भागे निर्धारित-पाठ्यक्रमाद् अतिरिक्तोऽपि अंशः सन्धि-समास-कारकादिषु (विषयस्य पौर्वापर्य-ज्ञानानुरोधात् प्रतिपादने पूर्णत्वानुरोधात् च) निविष्टः वर्तते, अतोऽत्र शिक्षकैः छात्राणां कृते यथावश्यकम् उपयोगः विधीयताम्।}

## सन्धिः

**सन्धिशब्दस्य व्युत्पत्तिः** — सम् उपसर्गपूर्वकात् डुधाञ् (धा) धातोः "उपसर्गे घोः किः" इति सूत्रेण 'कि' प्रत्यये कृते सन्धिरिति शब्दो निष्पद्यते।

**सन्धिशब्दस्य परिभाषा** — 'वर्णसन्धानं सन्धिः' अर्थात् द्वयोः वर्णयोः परस्परं यत् सन्धानं मेलनं वा भवति तत्सन्धिरिति कथ्यते।

**पाणिनीयपरिभाषा** — 'परः सन्निकर्षः संहिता' अर्थात् वर्णानाम् अत्यन्तनिकटता संहिता इति कथ्यते। यथा- सुधी+उपास्यः इत्यत्र ईकार-उकारवर्णयोः अत्यन्तनिकटता अस्ति। एतादृशी वर्णनिकटता एव संस्कृतव्याकरणे संहिता इति कथ्यते। संहितायाः विषये एव सन्धिकार्ये सति 'सुध्युपास्यः' इति शब्दसिद्धिर्जायते।

**सन्धिभेदाः** — संस्कृतव्याकरणे सन्धेः त्रयो भेदाः सन्ति। ते इत्थं सन्ति -

(१) अच्सन्धिः(स्वरसन्धिः)।

(२) हल्सन्धिः(व्यंजनसन्धिः)।

(३) विसर्गसन्धिः।

**अच्-सन्धिः**

यदा द्वयोः स्वरयोः सन्धानं मेलनं वा जायते, तत् सन्धानं स्वरसन्धिः अच्सन्धिः वा कथ्यते। अत्र अच्सन्धौ स्वरस्य स्थाने आदेशो भवति। स्वरसन्धयोऽष्टविधाः भवन्ति। तथा हि —

| | |
|---|---|
| १. यण्-सन्धिः।<br>२. अयादि-सन्धिः। | एतयोः सन्ध्योः पूर्वस्य एकस्यैव वर्णस्य स्थाने आदेशो भवति। |
| ३. गुणसन्धिः।<br>४. वृद्धिसन्धिः।<br>५. सवर्णदीर्घसन्धिः।<br>६. पूर्वरूपसन्धिः।<br>७. पररूपसन्धिः। | पञ्चस्वपि सन्धिषु पूर्वस्य परस्य च स्थाने एकादेशो भवति। |
| ८. प्रकृतिभावः। | अत्र आदेशाभावो भवति। |

**( १ ) यण्सन्धिः —**

"इको यणचि" इत्यनेन सूत्रेण संहितायाः विषये अचि परे सति पूर्ववर्तिनः इकः स्थाने स्याद् यण्। माहेश्वरसूत्रानुरूपं इ/ई, उ/ऊ, ऋ/ॠ, लृ एते वर्णाः इक् वर्णाः इति कथ्यन्ते। एवमेव य्, व्, र् ल् एते वर्णाः यण्वर्णाः इति कथ्यन्ते। उपरिलिखितानाम् इक्वर्णानां स्थाने अधोलिखिताः यण्वर्णाः यत्र क्रमशः भवन्ति, तत्र जायते यण् सन्धिः। इदानीं क्रमशः एतेषां स्थितिः उदाहरणानि च दीयन्ते —

(अ) इ/ई+अच्=य्+अच्

अति + उत्तमः = अत्युत्तमः
इति + अत्र = इत्यत्र
इति + आदि = इत्यादि
इति + अलम् = इत्यलम्
यदि + अपि = यद्यपि
प्रति + एकम् = प्रत्येकम्
नदी + उदकम् = नद्युदकम्
स्त्री + उत्सवः = स्त्र्युत्सवः
सुधी + उपास्यः = सुध्युपास्यः

(आ) उ/ऊ+अच्=व्+अच्

अनु + अयः = अन्वयः
सु + आगतम् = स्वागतम्
मधु + अरिः = मध्वरिः
गुरु + आदेशः = गुर्वादेशः
साधु + इति = साध्विति
वधू + आगमः = वध्वागमः
अनु + आगच्छति = अन्वागच्छति

(इ) ऋ/ॠ+अच्=र्+अच्

पितृ + ए = पित्रे
मातृ + आदेशः = मात्रादेशः
धातृ + अंशः = धात्रंशः
मातृ + आज्ञा = मात्राज्ञा
भ्रातृ + उपदेशः = भ्रात्रुपदेशः
मातृ + अनुमतिः = मात्रनुमतिः
सवितृ + उदयः = सवित्रुदयः
पितृ + आकृतिः = पित्राकृतिः

(ई) लृ+अच्=ल्+अच्

| | | | | |
|---|---|---|---|---|
| लृ | + | आकृति: | = | लाकृति: |
| लृ | + | अनुबन्ध: | = | लनुबन्ध: |
| लृ | + | आकार: | = | लाकार: |
| लृ | + | आदेश: | = | लादेश: |

**( २ ) अयादिसन्धिः —**

''एचोऽयवायाव:'' इत्यनेन सूत्रेण संहिताविषये अचि परे ''एच्'' इत्यस्य स्थाने अयादि: आदेश: भवति। माहेश्वरसूत्रानुरूपं क्रमश: ए, ओ, ऐ, औ इति वर्णा: ''एच्'' कथ्यन्ते। एतेषां चतुर्णां स्थाने क्रमश: अय्, अव्, आय्, आव् इति भवन्ति। एतेषां क्रमश: स्थिति: उदाहरणानि च प्रस्तूयन्ते —

(अ) ए+अच्=अय्+अच्

| | | | | |
|---|---|---|---|---|
| ने | + | अनम् | = | नयनम् |
| कवे | + | ए | = | कवये |
| हरे | + | ए | = | हरये |
| शे | + | अनम् | = | शयनम् |
| हरे | + | एहि | = | हरयेहि |
| चे | + | अनम् | = | चयनम् |

(आ) ओ+अच्=अव्+अच्

| | | | | |
|---|---|---|---|---|
| पो | + | अन: | = | पवन: |
| भो | + | अनम् | = | भवनम् |
| विष्णो | + | इह | = | विष्णविह |

(इ) ऐ+अच्=आय्+अच्

| | | | | |
|---|---|---|---|---|
| गै | + | अक: | = | गायक: |
| नै | + | अक: | = | नायक: |
| सै | + | अक: | = | सायक: |
| गै | + | अन्ति | = | गायन्ति |

(ई) औ+अच्=आव्+अच्

| | | | | |
|---|---|---|---|---|
| भौ | + | उक: | = | भावुक: |
| पौ | + | अक: | = | पावक: |
| असौ | + | अयम् | = | असावयम् |
| अग्नौ | + | इह | = | अग्नाविह |
| भौ | + | अयति | = | भावयति |
| इन्दौ | + | उदिते | = | इन्दावुदिते। |

**( ३ ) गुणसन्धिः —**

''आद् गुणः'' इत्यनेन सूत्रेण संहिताविषये अ/आ वर्णतः परे इ/ई, उ/ऊ, ऋ/ॠ, लृ वर्णेषु विद्यमानेषु पूर्वपरयोः स्थाने गुण–एकादेशः (अ, ए, ओ) भवति। इदानीं क्रमशः एतेषां स्थितिः उदाहरणानि च प्रस्तूयन्ते —

(अ) अ+इ=ए

उप + इन्द्रः = उपेन्द्रः
गज + इन्द्रः = गजेन्द्रः
न + इति = नेति
देव + इन्द्रः = देवेन्द्रः
विकल +इन्द्रियः = विकलेन्द्रियः
राम + इतिहासः = रामेतिहासः

(आ) आ+इ=ए

महा+ इन्द्रः = महेन्द्रः
तथा+ इति = तथेति
यथा +इच्छम् = यथेच्छम्
यथा+ इष्ट = यथेष्ट

(इ) अ+ई=ए

गण + ईशः = गणेशः
सर्व + ईशः = सर्वेशः
सुर + ईशः = सुरेशः
दिन+ ईशः = दिनेशः

(ई) आ+ई=ए

रमा + ईशः = रमेशः
गङ्गा + ईश्वरः = गङ्गेश्वरः
उमा + ईशः = उमेशः
महा + ईशः = महेशः

(उ) अ+उ=ओ

सूर्य + उदयः = सूर्योदयः
पर + उपकारः = परोपकारः
वृक्ष + उपरि = वृक्षोपरि
हित + उपदेशः = हितोपदेशः
पुरुष + उत्तमः = पुरुषोत्तमः

(ऊ) आ+उ=ओ

परीक्षा + उत्सवः = परीक्षोत्सवः

महा + उदयः = महोदयः

आ + उदकान्तम् = ओदकान्तम्

गङ्गा + उदकम् = गङ्गोदकम्

(ऋ) अ+ऊ=ओ

अत्यन्त + ऊर्ध्वम् = अत्यन्तोर्ध्वम्

एक + ऊन = एकोनः

गगन + ऊर्ध्वम् = गगनोर्ध्वम्

(ॠ) आ+ऊ=ओ

मायया + ऊर्जस्वि = माययोर्जस्वि

महा + ऊर्णम् = महोर्णम्

(ऌ) अ+ऋ=अर्

कृष्ण +ऋद्धिः = कृष्णर्द्धिः

ग्रीष्म +ऋतुः = ग्रीष्मर्तुः

वसन्त +ऋतुः = वसन्तर्तुः

राज +ऋषिः = राजर्षिः

(ए) आ+ऋ=अर्

महा + ऋषिः = महर्षिः

ब्रह्मा + ऋषिः = ब्रह्मर्षिः

महा + ऋद्धिः = महर्द्धिः

(ऐ) अ/आ+ऌ=अल्

तव + ऌकारः = तवल्कारः

मम + ऌकारः = ममल्कारः

तव + ऌदन्तः = तवल्दन्तः

**(४) वृद्धिसन्धिः —**

''वृद्धिरेचि'' इत्यनेन सूत्रेण संहिताविषये अ/आ वर्णतः परे 'एच्' (ए, ओ, ऐ, औ) विद्यमाने सति पूर्वपरयोः स्थाने वृद्धिरेकादेशः (आ, ऐ, औ) भवति। अधुना क्रमशः एतेषां स्थितिः उदाहरणानि च प्रस्तूयन्ते–

(अ) अ/आ+ए=ऐ

जन + एकता = जनैकता

एक + एकः = एकैकः

अत्र + एकमत्यम् = अत्रैकमत्यम्

राज+ एष: = राजैष:

बाला +एषा = बालैषा

तथा+ एव = तथैव

गंगा+ एषा = गंगैषा

सदा+ एव = सदैव

(आ) अ/आ+ओ=औ

वन + ओषधि: = वनौषधि:

जल + ओघ: = जलौघ:

गंगा + ओघ: = गंगौघ:

महा + ओजस: = महौजस:

बिम्ब + ओष्ठी = बिम्बौष्ठी

(इ) अ/आ+ऐ=ऐ

देव + ऐश्वर्यम् = देवैश्वर्यम्

दीर्घ + ऐकार: = दीर्घैकार:

नृप + ऐश्वर्यम् = नृपैश्वर्यम्

महा + ऐश्वर्यम् = महैश्वर्यम्

(ई) अ/आ+औ=औ

कृष्ण + औत्कण्ठ्यम् = कृष्णौत्कण्ठ्यम्

तव + औदार्यम् = तवौदार्यम्

जन + औचित्यम् = जनौचित्यम्

राम + औत्सुक्यम् = रामौत्सुक्यम्

महा + औषधि: = महौषधि:

मम + औदासीन्यम् = ममौदासीन्यम्

(उ) अ/आ+ऋ/ॠ=आर्

प्र + ऋच्छति = प्रार्च्छति

कम्बल + ऋणम् = कम्बलार्णम्

दश + ऋण: = दशार्ण:

सुख + ऋत: = सुखार्त:

वसन + ऋणम् = वसनार्णम्

**(५) सवर्णदीर्घसन्धि: —**

"अक: सवर्णे दीर्घ:" इत्यनेन सूत्रेण संहिता-विषये 'अक्' प्रत्याहारस्य परे सवर्णे अचि सति पूर्वपरयो: स्थाने दीर्घ-एकादेश: भवति। अत्र क्रमश: एतेषां स्थिति:उदाहरणानि च प्रस्तूयन्ते —

(अ) अ/आ+अ/आ=आ

| | | |
|---|---|---|
| दैत्य + | अरिः | = दैत्यारिः |
| शश + | अङ्कः | = शशाङ्कः |
| गौर + | अङ्गः | = गौराङ्गः |
| विद्या + | आलयः | = विद्यालयः |
| रत्न + | आकरः | = रत्नाकरः |
| यथा + | अर्थः | = यथार्थः |
| विद्या + | अभ्यासः | = विद्याभ्यासः |
| विद्या + | अर्थी | = विद्यार्थी |

(आ) इ/ई+इ/ई=ई

| | | |
|---|---|---|
| श्री + | ईशः | = श्रीशः |
| इति + | इव | = इतीव |
| अति + | इव | = अतीव |
| रवि + | इन्द्रः | = रवीन्द्रः |
| परि + | ईक्षा | = परीक्षा |
| गौरी + | ईशः | = गौरीशः |
| महती + | इच्छा | = महतीच्छा |

(इ) उ/ऊ+उ/ऊ=ऊ

| | | |
|---|---|---|
| विष्णु + | उदयः | = विष्णूदयः |
| भानु + | ऊष्मा | = भानूष्मा |
| गुरु + | उपदेशः | = गुरूपदेशः |
| वधु + | उत्सवः | = वधूत्सवः |
| भानु + | उदयः | = भानूदयः |
| मधु + | उत्तमम् | = मधूत्तमम् |

(ई) ऋ/ॠ + ऋ/ॠ= ॠ

| | | |
|---|---|---|
| होतृ + | ऋकारः | = होतॄकारः |
| पितृ + | ऋणम् | = पितॄणम् |
| कर्तृ + | ऋणि | = कर्तॄणि |
| कर्तृ + | ऋद्धिः | = कर्तॄद्धिः |

**( ६ ) पूर्वरूपसन्धिः** —

''एङः पदान्तादति'' इत्यनेन सूत्रेण पदान्ताद् एङोऽति परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति।

अयं भावः – पदान्ताद् एकाराद् ओकाराच्च अति परे (ए+अ अथवा ओ+अ अस्यामवस्थायाम्)

पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति। अकारस्य पूर्वरूपमेकादेशे सति अकारस्य स्पष्टप्रतिपत्तये 'ऽ' इति अवग्रहचिह्न प्रयुज्यते। उदाहरणानि —

(अ) ए+अ=ए (पदान्ताद् एकाराद् अति परे पूर्वरूपमेकादेशः)

अन्ते + अपि = अन्तेऽपि

ते + अत्र = तेऽत्र

हरे + अव = हरेऽव

मे + अन्तिके = मेऽन्तिके

दीर्घे + अहनि = दीर्घेऽहनि

(आ) ओ+अ=ओ (पदान्ताद् ओकाराद् अति परे पूर्वरूपमेकादेशः)

विष्णो+ अत्र = विष्णोऽत्र

सो + अवदत् = सोऽवदत्

रामो + अहसत् = रामोऽहसत्

को + अपि = कोऽपि

**(७) पररूपसन्धिः —**

१. "एङि पररूपम्" इत्यनेन सूत्रेण अवर्णान्तादुपसर्गादेङादौ धातौ परे पूर्वपरयोः स्थाने पररूपमेकादेशः स्यात्।

अयं भावः – अवर्णान्तादुपसर्गाद् एकारादौ धातौ परे, ओकारादौ धातौ परे च पूर्वपरयोः स्थाने क्रमशः एकारः ओकारश्च पररूपमेकादेशो भवति। अयं सूत्रः वृद्धेः अपवादः। उदाहरणानि—

(अ) अ+ए=ए (अवर्णान्तादुपसर्गाद् एकारादौ धातौ परे पूर्वपरयोः स्थाने एकारः पररूपमेकादेशः)

प्र+एजते=प्रेजते

(आ) अ+ओ=ओ (अवर्णान्तादुपसर्गाद् ओकारादौ धातौ परे पूर्वपरयोः स्थाने ओकारः पररूपमेकादेशः)

उप+ओषति=उपोषति

२. 'शकन्ध्वादिषु पररूपं वाच्यम्' इत्यनेन वार्तिकेन शकन्धु-आदिषु शब्देषु टिभागस्य पररूपमेकादेशः स्यात्।

अयं भावः – शकन्धु-आदीनां शब्दानां निर्माण-प्रक्रियायां टिभागस्य (शब्दस्य अन्तिम-अचः प्रभृति भागस्य) पररूपमेकादेशः स्यात्। उदाहरणानि

(अ) शक+अन्धुः

शक् अ (टिभागः)+अन्धुः = (टिभागस्य पररूपमेकादेशे) शक् अन्धुः = शकन्धुः

मनस्+ईषा = मन् अस् (टिभागः)+ईषा = (टिभागस्य पररूपमेकादेशे) मन्+ईषा = मनीषा

(आ) कर्क+अन्धुः= कर्क् अ+अन्धु = कर्कन्धुः

(इ) कुल+अटा = कुल् अ+अटा = कुलटा

(ई) पतत्+अञ्जलिः = पत् अत्+अञ्जलिः = पतञ्जलिः

**हल्सन्धिः**

यदा व्यञ्जनात् परे व्यञ्जनम् अथवा स्वरः आयाति तदा हल्सन्धिः भवति।

**( १ ) श्चुत्व सन्धिः**– स्तोः श्चुना श्चुः। अर्थः – सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

व्याख्या– यदा स् त् थ् द् ध् न् इत्येते वर्णाः श् च् छ् ज् झ् ञ् इत्येतेषां वर्णानाम् पूर्वम् पश्चात् वा आयान्ति तदा स् त् थ् द् ध् न् इत्येतेषां वर्णानां स्थाने क्रमशः श् च् छ् ज् झ् ञ् इत्येते वर्णाः भवन्ति। यथा–

| | | | | |
|---|---|---|---|---|
| सत् | + | चित् | = | सच्चित् |
| रामस् | + | चिनोति | = | रामश्चिनोति |
| हरिस् | + | शेते | = | हरिश्शेते |
| शार्ङ्गिन् | + | जय | = | शार्ङ्गिञ्जय |
| रामस् | + | च | = | रामश्च |
| कस् | + | चित् | = | कश्चित् |
| उद् | + | ज्वलः | = | उज्ज्वलः |

**( २ ) ष्टुत्व सन्धिः**= ष्टुना ष्टुः। अर्थः – स्तोः ष्टुना योगे ष्टुः स्यात्।

व्याख्या – यदा स् त् थ् द् ध् न् इत्येते वर्णाः ष् ट् ठ् ड् ढ् ण् इत्येतेषां वर्णानाम् पूर्वं पश्चाद् वा आयान्ति तदा स् त् थ् द् ध् न् इत्येतेषां वर्णानां स्थाने क्रमशः ष् ट् ठ् ड् ढ् ण् इत्येते वर्णाः भवन्ति। यथा–

| | | | | |
|---|---|---|---|---|
| तत् | + | टीका | = | तट्टीका |
| रामस् | + | षष्ठः | = | रामष्षष्ठः |
| रामस् | + | टीकते | = | रामष्टीकते |
| चक्रिन् | + | ढौकसे | = | चक्रिण्ढौकसे |
| पेष् | + | ता | = | पेष्टा |
| राष् | + | त्रम् | = | राष्ट्रम् |
| उद् | + | डयनम् | = | उड्डयनम् |
| इष् | + | तः | = | इष्टः |

**( ३ ) जश्त्व सन्धिः** — झलां जशोऽन्ते। अर्थः – पदान्ते झलां जशः स्युः।

व्याख्या– पदान्ते झल् प्रत्याहारान्तर्गतवर्णानां (वर्गस्य १, २, ३, ४ वर्णानां श् ष् स् ह् वर्णानां च) स्थाने जश्प्रत्याहारस्य (ज् ब् ग् ड् द्) वर्णाः भवन्ति। यथा–

| | | | | |
|---|---|---|---|---|
| वाक् | + | ईशः | = | वागीशः |
| जगत् | + | ईश | = | जगदीशः |
| षट् | + | आननः | = | षडाननः |
| दिक् | + | अम्बरः | = | दिगम्बरः |
| अच् | + | अन्तः | = | अजन्तः |

| | | | | |
|---|---|---|---|---|
| सुप् | + | अन्तः | = | सुबन्तः |
| षट् | + | दर्शनम् | = | षड्दर्शनम् |
| दिक् | + | गजः | = | दिग्गजः |

**( ४ ) चर्त्व सन्धिः** — खरि च। अर्थः - खरि परे झलां चरः स्युः।

व्याख्या - खरि (वर्गस्य १, २, श् ष् स्) परे झलां (वर्गस्य १, २, ३, ४ श् ष् स् ह्) स्थाने चर् (क् च् ट् त् प् श् स्) प्रत्याहारस्य वर्णाः भवन्ति। यथा–

| | | | | |
|---|---|---|---|---|
| सद् | + | कारः | = | सत्कारः |
| विपद् | + | कालः | = | विपत्कालः |
| सम्पद् | + | समयः | = | सम्पत्समयः |
| ककुभ् | + | प्रान्तः | = | ककुप्प्रान्तः |
| उद् | + | पन्नः | = | उत्पन्नः |

**( ५ ) अनुस्वार-सन्धिः** — मोऽनुस्वारः। अर्थः - मान्तस्य पदस्यानुस्वारः स्याद् हलि।

व्याख्या- पदान्तस्य मकारस्य स्थाने अनुस्वारः आदेशो भवति हलि (व्यञ्जने) परे। यथा–

| | | | | |
|---|---|---|---|---|
| हरिम् | + | वन्दे | = | हरिं वन्दे |
| गृहम् | + | गच्छति | = | गृहं गच्छति |
| दुःखम् | + | प्राप्नोति | = | दुःखं प्राप्नोति |
| त्वम् | + | पठसि | = | त्वं पठसि |
| अहम् | + | धावामि | = | अहं धावामि |
| सत्यम् | + | वद | = | सत्यं वद |

**( ६ ) परसवर्णसन्धिः** —

(६.१) यरोऽनुनासिकेऽनुनासिको वा — यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्।

व्याख्या- अनुनासिकव्यञ्जनेषु परेषु पदान्ते स्थितानां वर्गीयव्यञ्जनानां स्थाने तद्वर्गीयपञ्चमो वर्णः (अनुनासिकः) विकल्पेन भवति। उदाहरणानि —

| | | | |
|---|---|---|---|
| (ग्=ङ्) | वाग्+मूलम् | = | वाङ्मूलम्/वाग्मूलम् |
| (ड्=ण्) | षड्+मयूखाः | = | षण्मयूखाः/षड्मयूखाः |
| (द्=न्) | एतद्+मुरारिः | = | एतन्मुरारि/एतद्मुरारिः |

(६.२) प्रत्यये भाषायां नित्यम् (वा.)- अनुनासिकादौ प्रत्यये परे पदान्ते स्थितानां वर्गीयव्यञ्जनानां नित्यमेव अनुनासिकः आदेशो भवति। उदाहरणानि -

| | | | | | |
|---|---|---|---|---|---|
| (द्=न्) | चिद्+मयम् | = | चिन्+मयम् | = | चिन्मयम्। |
| | तद्+मात्रम् | = | तन्+मात्रम् | = | तन्मात्रम्। |
| (प्=म्) | अप्+मयम् | = | अम्+मयम् | = | अम्मयम्। |

(६.३) अनुस्वारस्य ययि परसवर्णः - अनुस्वारस्य ययि परे परसवर्णः स्यात्।

व्याख्या– अनुस्वारस्य स्थाने यय् प्रत्याहारान्तर्गतेषु वर्णेषु परेषु तत्तद्वर्गस्य पञ्चमो वर्णः (परसवर्णादेशः) भवति। यवले परे तु यँ, वँ, लँ इत्यादेशो भवति। उदाहरणानि –

| | | | | | | |
|---|---|---|---|---|---|---|
| (ं > ङ्) | अं+कितः | = | अङ्+कितः | = | अङ्कितः |
| (ं > ञ्) | मुं+चति | = | मुञ्+चति | = | मुञ्चति |
| (ं > ण्) | मुं+डनम् | = | मुण्+डनम् | = | मुण्डनम् |
| (ं > न्) | नं+दति | = | नन्+दति | = | नन्दति |
| (ं > म्) | कं+पते | = | कम्+पते | = | कम्पते |

(६.४) वा पदान्तस्य– पदान्तस्य अनुस्वारस्य ययि परे परसवर्णादेशो वा स्यात्।

व्याख्या– पदान्तस्य अनुस्वारस्य स्थाने यय्वर्णेषु परेषु तत्तद्वर्गस्य पञ्चमवर्णादेशो विकल्पेन भवति। इदमवधेयम्– उपसर्गः सर्वोऽपि सुबन्तः। अतः तस्य पदत्वम्। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (ं > ङ्) | त्वं+करोषि | = | त्वङ्+करोषि | = | त्वङ्करोषि/त्वं करोषि। |
| (ं > ञ्) | शत्रुं+जयति | = | शत्रुञ्+जयति | = | शत्रुञ्जयति/ शत्रुं जयति। |
| (ं > म्) | सं+पृक्तौ | = | सम्+पृक्तौ | = | सम्पृक्तौ/संपृक्तौ। |
| (ं > यँ) | सं+यमः | = | सयँ+यमः | = | सयँयमः/ संयमः। |
| (ं > वँ) | सं+वत्सरः | = | सवँ+वत्सरः | = | सवँवत्सरः/संवत्सरः। |
| (ं > लँ) | सं+लापः | = | सलँ+लापः | = | सलँलापः/संलापः। |

(६.५) तोर्लि– तवर्गस्य स्थाने लकारे परे परसवर्णः स्यात्।

व्याख्या– तवर्गस्य स्थाने लकारे परे परसवर्णो लकारादेशो भवति। तत्र नकारस्य स्थाने अनुनासिकलँकारो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (द्=ल्) | तद्+लयः | = | तल्+लयः | = | तल्लयः। |
| (त्=ल्) | जगत्+लयः | = | जगल्+लयः | = | जगल्लयः। |
| (न्=ल्) | विद्वान्+लिखति | = | विद्वालँ+लिखति | = | विद्वाल्लिँखति |
| (त्=ल्) | जहत्+लक्षणा | = | जहल्+लक्षणा | = | जहल्लक्षणा |
| (त्=ल्) | विलसत्+लङ्का | = | विलसल्+लङ्का | = | विलसल्लङ्का |

**विसर्गसन्धिः** —

यदा विसर्गस्य स्थाने किमपि परिवर्तनं भवति तदा सः विसर्गसन्धिः इति कथ्यते।

**(१) सत्वसन्धिः** – विसर्जनीयस्य सः

अर्थः – खरि परे विसर्जनीयस्य सः स्यात्

व्याख्या– विसर्गस्य स्थाने सकारो भवति खरि (वर्गस्य १, २, श् ष् स्) परे। यथा –

| | | |
|---|---|---|
| विष्णुः+त्राता | = | विष्णुस्त्राता |
| रामः+च | = | रामश्च |
| धनुः+टङ्कार | = | धनुष्टङ्कारः |

नि:+छल: = निश्छल:

**( २ ) विसर्गसन्धिः** – वा शरि

अर्थः – शरि परे विसर्गस्य विसर्गो वा स्यात्।

व्याख्या– विसर्गस्य स्थाने विकल्पेन विसर्गादेशो भवति शरि (श् ष् स्) परे। यथा –

हरि:+शेते = हरि: शेते/हरिश्शेते

नि:+सन्देह: = नि:सन्देह:/निस्सन्देह:

नृप:+षष्ठ: = नृप:षष्ठ:/नृपष्षष्ठ:

**( ३.१ ) उत्वसन्धिः** – अतो रोरप्लुतादप्लुते।

अर्थः – अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति।

व्याख्या– ह्रस्वात् अकारात् उत्तरस्य रो: (रेफस्य स्थाने) उकारादेशो भवति ह्रस्वे अकारे परे।

विशेषः – अ:+अ इति स्थिते विसर्गस्य स्थाने ओकारस्य मात्रा भवति, अन्तिमस्य अकारस्य च स्थाने अवग्रहः (ऽ) भवति। अर्थात् उत्वसन्धेः अनन्तरं गुणसन्धि: पररूपसन्धि: च भवत:। यथा –

क:+अपि = कोऽपि

राम:+अवदत् = रामोऽवदत्

राम:+अयम् = रामोऽयम्

**( ३.२ ) उत्वसन्धिः** – हशि च।

अर्थः – अप्लुतादतः परस्य रोरुः स्याद्धशि।

व्याख्या– ह्रस्वात् अकारात् उत्तरस्य रो: (रेफस्य स्थाने) उकारादेशो भवति हशि (वर्गस्य ३, ४, ५, ह् य् व् र् ल्) परे।

विशेषः – अ+हश् (वर्गस्य ३, ४, ५, ह् य् व् र् ल्) इति स्थिते विसर्गस्य स्थाने ओकारस्य मात्रा भवति। अर्थात् उत्वसन्धेः अनन्तरं गुणसन्धि: भवति। यथा–

शिव:+वन्द्य: = शिवो वन्द्य:

राम:+हसति = रामो हसति

बाल:+याति = बालो याति

बुध:+लिखति = बुधो लिखति

बाल:+रौति = बालो रौति

नम:+नम: = नमो नम:

राम:+जयति = रामो जयति

क्षीण:+भवति = क्षीणो भवति

मन:+हर: = मनोहर:

यश:+दा = यशोदा

**( ४.१ ) विसर्गस्य रेफः** - ''इचोऽशि विसर्गस्य रेफः'' - इचः (अ, आ इत्येतौ वर्जयित्वा स्वरात्) परस्य विसर्गस्य अशि (स्वरे मृदु-व्यञ्जने च) परे रेफादेशो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (:=र्) | मुनिः+इति | = | मुनि+र्+इति | = | मुनिरिति |
| (:=र्) | भानुः+असौ | = | भानु+र्+असौ | = | भानुरसौ |
| (:=र्) | तैः+आगतम् | = | तै+र्+आगतम् | = | तैरागतम् |
| (:=र्) | धेनुः+गच्छति | = | धेुन+र्+गच्छति | = | धेनुर्गच्छति |
| (:=र्) | एतैः+भक्षितम् | = | एतै+र्+भक्षितम् | = | एतैर्भक्षितम् |

(४.२) अव्ययसम्बन्धिनः ऋकारान्तशब्दस्य सम्बोधनसम्बन्धिनश्च विसर्गस्य अकारात् आकारात् च परस्यापि रेफादेशो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (:=र्) | पुनः+अत्र | = | पुन+र्+अत्र | = | पुनरत्र |
| (:=र्) | प्रातः+गच्छति | = | प्रात+र्+गच्छति | = | प्रातर्गच्छति |
| (:=र्) | पितः+वन्दे | = | पित+र्+वन्दे | = | पितर्वन्दे |
| (:=र्) | मातः+वन्दे | = | मात+र्+वन्दे | = | मातर्वन्दे |

**( ५ ) विसर्गस्य लोपः** -

(५.१) आतोऽशि विसर्गस्य लोपः — आकारात् परस्य विसर्गस्य अशि (स्वरे मृदुव्यञ्जने च) परे लोपो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (:=लोपः) | बालाः+अत्र | = | बाला+अत्र | = | बाला अत्र |
| (:=लोपः) | लताः+एधन्ते | = | लता+एधन्ते | = | लता एधन्ते |
| (:=लोपः) | ताः+गच्छन्ति | = | ता+गच्छन्ति | = | ता गच्छन्ति |
| (:=लोपः) | वृद्धाः+यान्ति | = | वृद्धा+यान्ति | = | वृद्धा यान्ति |
| (:=लोपः) | बालाः+हसन्ति | = | बाला+हसन्ति | = | बाला हसन्ति |

५.२ ''अतोऽनत्यचि विसर्गलोपः'' - अकारात् परस्य विसर्गस्य अकारं वर्जयित्वा स्वरे परे लोपो भवति। उदाहरणानि —

| | | | | | |
|---|---|---|---|---|---|
| (:=लोपः) | रामः+आगच्छति | = | राम+आगच्छति | = | राम आगच्छति। |
| | कृष्णः+एति | = | कृष्ण+एति | = | कृष्ण एति। |
| | बालः+इच्छति | = | बाल+इच्छति | = | बाल इच्छति। |

(५.३) ''एतत्तदोः सुलोपोऽकोरनञ्समासे हलि'' अककारयोः एतत्तदोः यः 'सुः' (स-विसर्गः) तस्य लोपः स्याद् हलि न तु नञ्समासे।

अयं भावः - नञ्समासं विहाय 'एषः' 'सः' इत्यनयो पदयोः विसर्गस्य अकारं विहाय यत्किञ्चद्वर्णे परे लोपो भवति। उदाहरणानि —

| | | | | |
|---|---|---|---|---|
| एषः+इच्छति | = | एष+इच्छति | = | एष इच्छति |
| एषः+गच्छति | = | एष+गच्छति | = | एष गच्छति |

| | | | | |
|---|---|---|---|---|
| सः+आगच्छति | = | स+आगच्छति | = | स आगच्छति |
| सः+तत्र = | | स+तत्र | = | स तत्र |
| एषः+विष्णुः | = | एष+विष्णुः | = | एष विष्णुः |
| सः+शम्भुः | = | स+शम्भुः | = | स शम्भुः |

(५.४) ''रो रि'' रेफस्य रेफे परे लोपः स्यात्।

अयं भावः - स्वरात्परस्य विसर्गस्य रेफे परे लोपो भवति। लोपे कृते पूर्वस्वरः दीर्घश्च भवति।

उदाहरणानि —

| | | | | |
|---|---|---|---|---|
| कविः+रचयति | = | कवि+रचयति | = | कवी रचयति |
| भानुः+राजते | = | भानु+राजते | = | भानू राजते |
| पुनः+रमते | = | पुन+रमते | — | पुना रमते |
| हरिः+रम्यः | = | हरि+रम्यः | — | हरी रम्यः |
| शम्भुः+राजते | = | शम्भु+राजते | — | शम्भू राजते |

# समासः

**समासशब्दस्य व्युत्पत्तिः** — सम् उपसर्गपूर्वकात् असुँ (अस्) धातोः घञि प्रत्यये कृते 'समासः' इति शब्दो निष्पद्यते। अस्य अर्थः संक्षिप्तीकरणमिति अस्ति।

**समासस्य परिभाषा** — समसनं समासः अथवा अनेकपदानाम् एकपदीभवनं समासः। अर्थात् यदा अनेकपदानि मिलित्वा एकपदं जायन्ते तदा सः समासः इति कथ्यते। यथा - सीतायाः पति = सीतापतिः। अत्र सीतायाः पतिः इति पदद्वयं मिलित्वा एकपदं (सीतापतिः) जातम् अतः अयमेव समासः अस्ति।

समासे जाते अर्थे किमपि परिवर्तनं न भवति। योऽर्थः 'सीतायाः पतिः' इत्यस्य विग्रहवाक्यस्य अस्ति सः एव अर्थः 'सीतापतिः' इत्यस्य समस्तशब्दस्य अस्ति।

**पूर्वोत्तरविभक्तिलोपः** — सीतायाः पतिः = सीतापतिः। अस्मिन् विग्रहे सीतायाः इत्यत्र षष्ठीविभक्तिः, पतिः इत्यत्र प्रथमाविभक्तिश्च श्रूयेते। समासे कृते अनयोः द्वयोरपि विभक्त्योः लोपो भवति। तत्पश्चात् 'सीतापति' इति समस्तशब्दात् पुनरपि प्रथमाविभक्तिः क्रियते इत्येव सर्वत्र अवगन्तव्यम्।

समासयुक्तः शब्दः समस्तपदं कथ्यते। यथा- 'सीतापतिः' इति समस्तपदम्। समस्तशब्दस्य अर्थं बोधयितुं यद् वाक्यम् उच्यते तद्वाक्यं विग्रहः इति कथ्यते। यथा-सीतायाः पतिः इति वाक्यं विग्रहः अस्ति।

**समासस्यभेदाः** — संस्कृतभाषायां समासस्य मुख्यरूपेण चत्वारः भेदाः सन्ति। समासे प्रायशः द्वे पदे भवतः - पूर्वपदम् उत्तरपदम् च। पदस्य अर्थः पदार्थः भवति। यस्य पदार्थस्य प्रधानता भवति तदनुरूपेण एव समासस्य संज्ञा अपि भवति। यथा प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः भवति। प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः भवति। तत्पुरुषस्य भेदः कर्मधारयः भवति। कर्मधारयस्य भेदः द्विगुः भवति। प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिः भवति। प्रायेण उभयपदार्थप्रधानः द्वन्द्वः भवति। एवं समासस्य सामान्यरूपेण षड्भेदाः भवन्ति।

**१. अव्ययीभावसमासः**

यदा विभक्ति, समीप -इत्यादिषु अर्थेषु वर्तमानम् अव्ययपदं सुबन्तेन सह नित्यं समस्यते तदा असौ अव्ययीभावसमासो भवति। अथवा इदमत्र अवगन्तव्यम्-

१. अस्य समासस्य प्रथमशब्दः अव्ययं भवति।
२. अव्ययशब्दार्थस्य अर्थात् पूर्वपदार्थस्य प्रधानता भवति।
३. समासस्य पदद्वयं मिलित्वा अव्ययं भवति।
४. अव्ययीभावसमासः नपुंसकलिङ्गस्य एकवचने भवति। यथा-

| **अव्ययपदम्** | **अव्ययस्यार्थः** | **विग्रहः** | **समस्तपदम्** |
|---|---|---|---|
| १. अधि | सप्तमीविभक्त्यर्थे | हरौ इति | अधिहरि |
| २. उप | समीपार्थे | कृष्णस्य समीपम् | उपकृष्णम् |
| ३. अनु | योग्यतार्थे | रूपस्य योग्यम् | अनुरूपम् |
| ४. प्रति | वीप्सार्थे | दिनं दिनं प्रति | प्रतिदिनम् |
| ५. निर् | अभावार्थे | मक्षिकाणाम् अभावः | निर्मक्षिकम् |
| ६. यथा | अनतिक्रमार्थे | शक्तिम् अनतिक्रम्य | यथाशक्ति |

**२. तत्पुरुषसमासः -**

तत्पुरुषसमासे प्रायेण उत्तरपदार्थस्य प्रधानता भवति। यथा- राज्ञः पुरुषः - राजपुरुषः। अत्र उत्तरपदं पुरुषः अस्ति, तस्य एव प्रधानता अस्ति। 'राजपुरुषम् आनय' इति उक्ते सति पुरुषः एव आनीयते न तु राजा। तत्पुरुषसमासे पूर्वपदे या विभक्तिः भवति, प्रायेण तस्याः नाम्ना एव समासस्य अपि नाम भवति। यथा-

| | | | |
|---|---|---|---|
| कृष्णं श्रितः | - | कृष्णश्रितः | (द्वितीयातत्पुरुषः) |
| ग्रामं गतः | - | ग्रामगतः | (द्वितीयातत्पुरुषः) |
| हरिणा त्रातः | - | हरित्रातः | (तृतीयातत्पुरुषः) |
| भूतेभ्यः बलिः | - | भूतबलिः | (चतुर्थीतत्पुरुषः) |
| चोराद् भयम् | - | चोरभयम् | (पञ्चमीतत्पुरुषः) |
| राज्ञः पुरुषः | - | राजपुरुषः | (षष्ठीतत्पुरुषः) |
| अक्षेशु शौण्डः | - | अक्षशौण्डः | (सप्तमीतत्पुरुषः) |

**३. कर्मधारयसमासः**

यदा तत्पुरुषसमासस्य द्वयोः पदयोः एकविभक्तिः अर्थात् समानविभक्तिः भवति तदा सः समानाधिकरणः तत्पुरुषसमासः कथ्यते। अयमेव समासः कर्मधारयः इति नाम्ना ज्ञायते। अस्मिन् समासे साधारणतया पूर्वपदं विशेषणम् उत्तरपदञ्च विशेष्यं भवति। यथा- नीलम् कमलमम्= नीलकमलम्।

१. अस्मिन् उदाहरणे नीलम् कमलम् इति द्वयोः पदयोः समानविभक्तिः अर्थात् प्रथमा विभक्तिः अस्ति।

२. अत्र नीलम् इति पदं विशेषणम् कमलम् इति पदञ्च विशेष्यम्। अत एव अयं कर्मधारयः समासः अस्ति।

अस्य उदाहरणानि अधोलिखितानि सन्ति —

**(१) विशेषण-विशेष्यकर्मधारयः -**

| **विग्रहः** | | **समासः** |
|---|---|---|
| पीतम् अम्बरम् इति | = | पीताम्बरम् |
| रक्तम् कमलम् इति | = | रक्तकमलम् |
| वीरः पुरुषः इति | = | वीरपुरुषः |
| दीर्घा रज्जुः इति | = | दीर्घरज्जुः |
| कुत्सितः राजा इति | = | कुराजा |
| महान् पुरुषः इति | = | महापुरुषः |
| श्वेतं वस्त्रम् इति | = | श्वेतवस्त्रम् |
| उन्नतः वृक्षः इति | = | उन्नतवृक्षः |
| सुन्दरः बालकः इति | = | सुन्दरबालकः |
| एकः पुरुषः इति | = | एकपुरुषः |
| परमः पुरुषः इति | = | परमपुरुषः |

| | | |
|---|---|---|
| नीलम् उत्पलम् इति | = | नीलोत्पलम् |
| महान् राजा इति | = | महाराजः |

**( २ ) उपमानोपमेय कर्मधारयः –**

| | | |
|---|---|---|
| घनः इव श्यामः इति | = | घनश्यामः |
| कुसुमम् इव कोमलम् इति | = | कुसुमकोमलम् |
| चन्द्रः इव मुखम् | = | चन्द्रमुखम् |
| शैल इव उन्नतः इति | = | शैलोन्नतः |
| वज्रम् इव कठोरम् इति | = | वज्रकठोरम् |

**( ३ ) उपमानोत्तरपदकर्मधारयः –**

| | | |
|---|---|---|
| पुरुषः व्याघ्रः इव | = | पुरुषव्याघ्रः |
| पुरुषः सिंहः इव | = | पुरुषसिंहः |
| पुरुषः ऋषभः इव | = | पुरुषर्षभः |
| करः किसलयम् इव | = | करकिसलयम् |
| मुखम् कमलम् इव | = | मुखकमलम् |
| पुरुषः नागः इव | = | पुरुषनागः |

**( ४ ) अवधारणपूर्वपदकर्मधारयः –**

विशेषणं विशेष्येण समस्यते। अत्र अवधारणार्थं द्योतयितुं विग्रहवाक्ये विशेषणात् परम् 'एव' शब्दः प्रयुज्यते। यथा —

| | | |
|---|---|---|
| विद्या एव धनम् | = | विद्याधनम् |
| गुरुः एव देवः | = | गुरुदेवः |
| तपः एव धनम् | = | तपोधनम् |
| वेदः एव सम्पत् | = | वेदसम्पत् |

**४. द्विगुसमासः**

१.'संख्यापूर्वो द्विगुः' इति पाणिनीयसूत्रानुसारं यदा कर्मधारयसमासस्य पूर्वपदं संख्यावाची उत्तरपदञ्च संज्ञावाची भवति तदा सः 'द्विगुसमासः' कथ्यते।

२. अयं समासः प्रायः समूहार्थे भवति।

३. समस्तपदं सामान्यतया नपुंसकलिङ्गस्य एकवचने अथवा स्त्रीलिङ्गस्य एकवचने भवति।

४. अस्य विग्रहे षष्ठीविभक्तेः प्रयोगः क्रियते। यथा —

| | | |
|---|---|---|
| १. सप्तानां दिनानां समाहारः इति | = | सप्तदिनम् |
| २. त्रयाणां भुवनानां समाहारः इति | = | त्रिभुवनम् |
| ३. पञ्चानां पात्राणां समाहारः इति | = | पञ्चपात्रम् |
| ४. पञ्चानां रात्रीणां समाहारः इति | = | पञ्चरात्रम् |

| | | |
|---|---|---|
| ५. चतुर्णां युगानां समाहारः इति | = | चतुर्युगम् |
| ६. सप्तानां ऋषीणां समाहारः इति | = | सप्तर्षिः |
| ७. सप्तानाम् अह्नां समाहारः इति | = | सप्ताहः (सप्त+अहन्) |

कुत्रचित् द्विगुसमासःस्त्रीलिङ्गे अपि भवति यथा —

| | | |
|---|---|---|
| १. पञ्चानां वटानां समाहारः इति | = | पञ्चवटी |
| २. अष्टानाम् अध्यायानां समाहारः इति | = | अष्टाध्यायी |
| ३. त्रयाणां लोकानां समाहारः इति | = | त्रिलोकी |
| ४. सप्तानां शतस्य समाहारः इति | = | सप्तशती |
| ५. शतस्य अब्दानां समाहारः इति | = | शताब्दी |
| ६. त्रयाणां फलानां समाहारः इति | = | त्रिफला |

**५. बहुव्रीहिसमासः**

समासे यदा अन्यपदार्थस्य प्रधानता भवति तदा सः बहुव्रीहिसमासः कथ्यते। अर्थात् अस्मिन् समासे न तु पूर्वपदार्थस्य प्रधानता भवति न हि उत्तरपदार्थस्य प्रत्युत द्वौ अपि पदार्थौ मिलित्वा अन्यपदार्थस्य बोधं कारयतः। समस्तपदस्य प्रयोगः अन्यपदार्थस्य विशेषणरूपेण भवति। यथा— 'पीतम्' 'अम्बरं' यस्य सः = पीताम्बरः (विष्णुः)।

अत्र पीतम् तथा च अम्बरम् इत्यनयोः पदयोः अर्थस्य प्रधानता नास्ति अर्थात् 'पीला वस्त्र' इत्यर्थस्य ग्रहणं न भवति प्रत्युत उभौ पदार्थौ तु मिलित्वा अन्यपदार्थस्य अर्थात् 'विष्णुः' इत्यस्य बोधं कारयतः अर्थात् पीताम्बरः इति समस्तपदस्यार्थः 'विष्णुः' अस्ति अत एव अत्र बहुव्रीहिसमासः अस्ति।

अस्य अन्यानि उदाहरणानि अधोलिखितानि सन्ति। यथा —

**( १ ) समानाधिकरण-बहुव्रीहिः** - यदा समासस्य पूर्वोत्तरपदयोः समानविभक्तिः (प्रथमा विभक्तिः) भवति तदा सः समानाधिकरणबहुव्रीहिः भवति। यथा —

| | | |
|---|---|---|
| १. प्राप्तम् उदकं यं सः | = | प्राप्तोदकः (ग्रामः) |
| २. हताः शत्रवः येन सः | = | हतशत्रुः (राजा) |
| ३. दत्तं भोजनं यस्मै सः | = | दत्तभोजनः (भिक्षुकः) |
| ४. पतितं पर्णं यस्मात् सः | = | पतितपर्णः (वृक्षः) |
| ५. दश आननानि यस्य सः | = | दशाननः (रावणः) |
| ६. वीराः पुरुषाः यस्मिन (ग्रामे) सः | = | वीरपुरुषः (ग्रामः) |
| ७. चत्वारि मुखानि यस्य सः | = | चतुर्मुखः (ब्रह्मा) |

**( २ ) व्यधिकरण-बहुव्रीहिः** - यदा समासस्य पूर्वोत्तरपदयोः भिन्न-विभक्तिः भवति तदा सः व्यधिकरणबहुव्रीहिः भवति। यथा —

| | | |
|---|---|---|
| १. चक्रं पाणौ यस्य सः | = | चक्रपाणिः (विष्णुः) |
| २. शूलं पाणौ यस्य सः | = | शूलपाणिः (शिवः) |

| | | |
|---|---|---|
| ३. धनुः पाणौ यस्य सः | = | धनुष्पाणिः (रामः) |
| ४. चन्द्रः शेखरे यस्य सः | = | चन्द्रशेखरः (शिवः) |
| ५. रघुकुले जन्म यस्य सः | = | रघुकुलजन्मा (रामचन्द्रः) |

**( ३ ) तुल्ययोगे बहुव्रीहिः** - अत्र सहशब्दस्य तृतीयान्तपदेन सह समासो भवति। यथा-

| | | |
|---|---|---|
| १. पुत्रेण सहितः | = | सपुत्रः |
| २. बान्धवैः सहितः | = | सबान्धवः |
| ३. विनयेन सह विद्यमानम् | = | सविनयम् |
| ४. आदरेण सह विद्यमानम् | = | सादरम् |
| ५. पत्न्या सह वर्तमानः | = | सपत्नीक (वसिष्ठः) |

**( ४ ) उपमानवाचकबहुव्रीहिः** -

| | | |
|---|---|---|
| १. चन्द्रः इव मुखं यस्याः सा | = | चन्द्रमुखी |
| २. पाषाणवत् हृदयं यस्य सः | = | पाषाणहृदयः |

**६. द्वन्द्वसमासः**

द्वन्द्वसमासे परस्परं साकांक्षयोः पदयोः मध्ये 'च' आगच्छति, अतएव द्वन्द्वसमासः उभयपदार्थप्रधानः भवति। यथा- धर्मः च अर्थः च - धर्मार्थौ। अत्र पूर्वपदं 'धर्मः' उत्तरपदम् च 'अर्थः', अनयोः द्वयोः अपि प्रधानता अस्ति। द्वन्द्वसमासे समस्तपदं प्रायशः द्विवचने बहुवचने वा भवति। यथा —

| | | |
|---|---|---|
| हरिश्च हरश्च | = | हरिहरौ |
| शिवश्च केशवश्च | = | शिवकेशवौ। |
| माता च पिता च | = | मातापितरौ |
| हेमन्तश्च शिशिरश्च वसन्तश्च | = | हेमन्तशिशिरवसन्ताः |

समाहार (समूहः) इत्यस्य अर्थे द्वन्द्वसमासस्य प्रायेण नपुंसकलिङ्गे एकवचने प्रयोगः भवति। यथा-

| | | |
|---|---|---|
| पाणी च पादौ च एषां समाहारः | = | पाणिपादम्। |
| शिरश्च ग्रीवा च अनयोः समाहारः | = | शिरोग्रीवम्। |
| वाक् च त्वक् च अनयोः समाहारः | = | वाक्त्वचम्। |
| छत्रं च उपानत् च अनयोः समाहारः | = | छत्रोपानहम्। |

## अभ्यासः

**वस्तुनिष्ठप्रश्नाः**

१. अव्ययीभावसमासस्य उदाहरणम् अस्ति —

(अ) पीताम्बरः (आ) नीलकमलम्

(इ) यथाशक्ति (ई) त्रिलोकी ( )

२. अव्ययीभाव-समासस्य उदाहरणम् अस्ति —

(अ) महापुरुषः (आ) चतुर्युगम्

(इ) उपकृष्णम् (ई) प्राप्तोदकः ( )

३. कर्मधारयसमासस्य उदाहरणम् अस्ति —

(अ) पीताम्बरम् (आ) पीताम्बरः

(इ) निर्मक्षिकम् (ई) पञ्चपात्रम् ( )

४. द्वन्द्वसमासस्य उदाहरणम् अस्ति —

(अ) दशाननः (आ) दशपात्रम्

(इ) वाक्त्वचम् (ई) महापुरुषः ( )

**अतिलघूत्तरात्मकप्रश्नाः**

निम्नलिखितपदानां समासविग्रहः कर्तव्यः -

१. घनश्यामः - ................................................

२. प्रतिदिनम् - ................................................

३. छत्रोपानहम् - ................................................

४. विद्याधनम् - ................................................

५. अधिहरि - ................................................

**लघूत्तरात्मकप्रश्नाः**

१. निम्नलिखितपदानां समासविग्रहं कृत्वा समासस्य नामापि लेखनीयम्-

| समस्तपदम् | विग्रहः | समासस्य नाम |
|---|---|---|
| १. सुन्दरबालकः | .......... | ................. |
| २. चतुर्युगी | .......... | .................. |
| ३. पुरुषव्याघ्रः | .......... | .................. |
| ४. अनुरूपम् | ........... | .................. |
| ५. घनश्यामः | ........... | .................. |
| ६. शिरोग्रीवम् | ........... | ................... |

२. निम्नलिखितविग्रहवाक्यानां समासः करणीय —

१. श्वेतं वस्त्रम् – .................

२. मुखं कमलम् इव – .................

३. रूपस्य योग्यम् – .................

४. उन्नतः वृक्षः – .................

३. 'क'-खण्डं 'ख'-खण्डेन सह योजयत।

| **कखण्डः** | **खखण्डः** |
|---|---|
| (१) अव्ययीभावसमासः | उपवनम् |
| (२) द्वन्द्वसमासः | कुसुमकोमलम् |
| (३) कर्मधारयसमासः | हरिहरौ। |

# कारकम्

**कारकस्य परिभाषा- क्रियाजनकं कारकम्** अथवा **क्रियां करोति इति कारकम्।**

अर्थात् यः क्रियां सम्पादयति अथवा यस्य क्रियया सह साक्षात् परम्परया वा सम्बन्धो भवति सः 'कारकम्' इति कथ्यते।

क्रियया सह कारकाणां साक्षात् परम्परया वा सम्बन्धः कथं भवति इति बोधयितुम् अत्र वाक्यमेकं प्रस्तूयते। यथा –

"हे मनुष्याः! नरदेवस्य पुत्रः जयदेवः स्वहस्तेन कोषात् निर्धनेभ्यः ग्रामे धनं ददाति।"

अत्र क्रियया सह कारकाणां सम्बन्धं ज्ञातुम् एवं प्रकारेण प्रश्नोत्तरमार्गः आश्रयणीयः –

| **प्रश्नः** | **उत्तरम्** | **कारकम्** | **विभक्तिः** |
|---|---|---|---|
| (१) कः ददाति | जयदेवः | (कर्त्ता) | प्रथमा |
| (२) किम् ददाति | धनम् | (कर्म) | द्वितीया |
| (३) केन ददाति | स्वहस्तेन | (करणम्) | तृतीया |
| (४) केभ्यः ददाति | निर्धनेभ्यः | (सम्प्रदानम्) | चतुर्थी |
| (५) कस्मात् ददाति | कोषात् | (अपादानम्) | पञ्चमी |
| (६) कुत्र ददाति | ग्रामे | (अधिकरणम्) | सप्तमी |

एवमेव **जयदेवः** इति कर्तृकारकस्य तु क्रियया सह साक्षात् सम्बन्धः अस्ति अन्येषां कारकाणां च परम्परया सम्बन्धः अस्ति। अतः इमानि सर्वाणि कारकाणि कथ्यन्ते। परन्तु अस्य एव वाक्यस्य **हे मनुष्याः, नरदेवस्य** च इति पदद्वयस्य '**ददाति**' इति क्रियया सह साक्षात् परम्परया वा सम्बन्धो नास्ति। अतः इदं पदद्वयं कारकम् नास्ति। सम्बन्धः कारकं तु नास्ति परन्तु तस्मिन् षष्ठी विभक्तिः भवति।

**कारकाणां संख्या** – इत्थं कारकाणां संख्या षड् भवति। यथोक्तम् –

**कर्त्ता कर्म च करणं च सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्।।**

अत्र कारकाणां विभक्तीनां च सामान्यपरिचयः प्रस्तूयते –

**प्रथमा-विभक्तिः**

**(१)** यः क्रियायाः करणे स्वतन्त्रः भवति सः कर्त्ता इति कथ्यते (स्वतन्त्रः कर्त्ता)। उक्तकर्तरि च प्रथमा विभक्तिः भवति। यथा- रामः पठति।

अत्र पठनक्रियायाः स्वतन्त्ररूपेण सम्पादकः रामः अस्ति। अतः अयम् एव कर्त्ता अस्ति। कर्तरि च प्रथमा विभक्तिः भवति।

**(२)** कर्मवाच्ये कर्मणि प्रथमा विभक्तिः भवति। यथा – मया ग्रन्थः पठ्यते।

**(३)** सम्बोधने प्रथमा विभक्तिः भवति (सम्बोधने च) यथा –
हे बालकाः! यूयं कुत्र गच्छथ?

(४) कस्यचित् संज्ञादिशब्दस्य (प्रातिपदिकस्य) अर्थं, लिङ्गं, परिमाणं, वचनं च प्रकटीकर्तुं प्रथमायाः विभक्तेः प्रयोगः क्रियते। यतोहि विभक्तेः प्रयोगं विना कोऽपि शब्दः स्वकीयमर्थं दातुं समर्थो नास्ति अत एव अस्मिन् विषये प्रसिद्धं कथनमस्ति – 'अपदं न प्रयुञ्जीत।' उदाहरणार्थम् – बलदेवः, पुरुषः, लघुः, लता।

(५) 'इति' शब्दस्य योगे प्रथमा विभक्तिः भवति।
यथा –
वयम् इमं जयन्तः इति नाम्ना जानीमः।

**द्वितीया विभक्तिः**

(१) कर्त्ता क्रियया यं सर्वाधिकम् इच्छति तस्य कर्मसंज्ञा भवति (कर्तुरीप्सिततमं कर्म), कर्मणि च द्वितीया विभक्तिः भवति (कर्मणि द्वितीया), यथा –
(१) रामः **ग्रामं** गच्छति।
(२) बालकः **वेदं** पठन्ति।
(३) वयं **नाटकं** द्रक्ष्यामः।
(४) साधुः **तपस्याम्** अकरोत्।
(५) सन्दीपः **सत्यं** वदेत्।

(२) अधोलिखितशब्दानां योगे द्वितीयाविभक्तिः भवति। यथा –

| | | |
|---|---|---|
| (१) अभितः/उभयतः (दोनों ओर) | – | **राजमार्गम्** अभितः वृक्षाः सन्ति। |
| (२) परितः/सर्वतः (चारों ओर) | – | **ग्रामं** परितः क्षेत्राणि सन्ति। |
| (३) समया/निकषा (समीप में) | – | **विद्यालयं** निकषा देवालयः अस्ति। |
| (४) अन्तरेण/विना (बिना) | – | प्रदीपः **पुस्तकं** विना/अन्तरेण पठति। |
| (५) अन्तरा (बीच में) | – | **रामं श्यामं** च अन्तरा देवदत्तः अस्ति। |
| (६) धिक् (धिक्कार) | – | **दुष्टं** धिक्। |
| (७) हा (हाय) | – | हा **दुर्जनम्**! |
| (८) प्रति (ओर) | – | छात्राः **विद्यालयं** प्रति गच्छन्ति। |
| (९) अनु (पीछे) | – | राजपुरुषः **चौरम्** अनु धावति। |
| (१०) यावत् (तक) | – | गणेशः **वनं** यावत् गच्छति। |
| (११) अधोऽधः (सबसे नीचे) | – | **भूमिम्** अधोऽधः जलम् अस्ति। |
| (१२) अध्यधि (अन्दर-अन्दर) | – | **लोकम्** अध्यधि हरिः अस्ति। |
| (१३) उपर्युपरि (ऊपर-ऊपर) | – | **लोकम्** उपर्युपरि सूर्यः अस्ति। |

(३) अधि-उपसर्गपूर्वक-शीङ्-स्था-आस्-धातूनां प्रयोगे एषाम् आधारस्य कर्मसंज्ञा भवति, कर्मणि च द्वितीया विभक्तिः भवति (अधिशीङ्स्थासां कर्म)। उदाहरणार्थम् –

(१) अधिशेते (सोता है) – सुरेशः **शय्याम्** अधिशेते।

(२) अधितिष्ठति (बैठता है) - अध्यापकः **आसन्दिकाम्** अधितिष्ठति।
(३) अध्यास्ते (बैठता है) - नृपः **सिंहासनम्** अध्यास्ते।

(४) उप-अधि-आङ् (आ)-उपसर्गपूर्वक-वस् धातोः प्रयोगे अस्य आधारस्य कर्मसंज्ञा भवति, कर्मणि च द्वितीया विभक्तिः भवति (उपान्वध्याङ्वसः)।

(१) उपवसति (पास में रहता है) - श्यामः **नगरम्** उपवसति।
(२) अनुवसति (पीछे रहता है) - कुलदीपः **गृहम्** अनुवसति।
(३) अधिवसति (में रहता है) - सुरेशः **जयपुरम्** अधिवसति।
(४) आवसति (रहता है) - हरिः **वैकुण्ठम्** आवसति।

(५) ''अभि-नि'' उपसर्गद्वयपूर्वक-विश्-धातोः प्रयोगे सति अस्य आधारस्य कर्म-संज्ञा भवति, कर्मणि च द्वितीया विभक्तिः भवति (अभिनिविशश्च)।

(१) अभिनिविशते (प्रवेश करता है) - दिनेशः **ग्रामम्** अभिनिविशते।

(६) अपादानादिकारकाणां यत्र अविवक्षा अस्ति तत्र तेषां कर्मसंज्ञा भवति, कर्मणि च द्वितीयाविभक्तिः भवति (अकथितं च)। संस्कृतभाषायां एतादृशाः षोडशधातवः सन्ति येषां प्रयोगे एकं तु मुख्यं कर्म भवति अपरञ्च अपादानादिकारकैः अविवक्षितं गौणं कर्म भवति। अस्मिन् गौणे कर्मणि अपि द्वितीया विभक्तिः भवति। इमे धातवः एव द्विकर्मकधातवः कथ्यन्ते। एतेषां प्रयोगः अत्र क्रियते -

(१) दुह् (दुहना) - गोपालः **गां** पयः दोग्धि।
(गोपाल गाय से दूध दुहता है)

(२) याच् (मांगना) - सुरेशः **महेशं** पुस्तकं याचते।
(सुरेश महेश से पुस्तक मांगता है)

(३) पच् (पकाना) - पाचकः **तण्डुलान्** ओदनं पचति।
(पाचक चावलों से भात पकाता है)

(४) दण्ड् (दण्ड देना) - राजा **गर्गान्** शतं दण्डयति।
(राजा गर्गों को सौ रुपये का दण्ड देता है)

(५) प्रच्छ् (पूछना) - सः **माणवकं** पन्थानं पृच्छति।
(वह बालक से मार्ग पूछता है)

(६) रुध् (रोकना) - ग्वालः **व्रजं** गाम् अवरुणद्धि।
(ग्वाला गाय को व्रज में रोकता है)

(७) चि (चुनना) - मालाकारः **लतां** पुष्पं चिनोति।
(माली लता से पुष्प चुनता है)

(८) जि (जीतना) - नृपः **शत्रुं** राज्यं जयति।
(राजा शत्रु से राज्य को जीतता है)

(९) ब्रू (बोलना)/ - गुरुः **शिष्यं** धर्मं ब्रूते/शास्ति।

शास् (कहना) (गुरु शिष्य से धर्म कहता है)

(१०) मथ् (मथना) - सः **क्षीरनिधिं** सुधां मथ्नाति। (वह क्षीरसागर से अमृत मथता है)

(११) मुष् (चुराना) - चौरः **देवदत्तं** धनं मुष्णाति। (चोर देवदत्त से धन चुराता है)

(१२) नी (ले जाना) - सः अजां **ग्रामं** नयति। (वह बकरी को गाँव ले जाता है)

(१३) हृ (हरण करना) - सः **ग्रामं** धनं हरति। (वह गाँव में धन को ले जाता है)

(१४) वह (ले जाना) - कृषकः **ग्रामं** भारं वहति। (किसान गाँव में बोझा ले जाता है)

(१५) कृष् (खींचना) - कृषकः **क्षेत्रं** महिषीं कर्षति। (किसान खेत में भैंस को खींचता है)

(७) कालवाचिनि शब्दे मार्गवाचिनि शब्दे च अत्यन्तसंयोगे गम्यमाने द्वितीया विभक्तिः भवति- (कालाध्वनोरत्यन्तसंयोगे)।

(१) सुरेशः अत्र **पञ्चदिनानि** पठति। (सुरेश यहाँ लगातार पाँच दिन से पढ़ रहा है)

(२) मोहनः **मासम्** अधीते। (मोहन लगातार महीने भर पढ़ता है)

(३) नदी **क्रोशं** कुटिया अस्ति। (नदी कोस भर तक लगातार टेढ़ी है)

(४) प्रदीपः **योजनं** पठति। (प्रदीप लगातार एक योजन तक पढ़ता है)

**तृतीयाविभक्तिः**

**(१)** (क) क्रियासिद्धौ यत् सर्वाधिकं सहायकं भवति तस्य कारकस्य करणसंज्ञा भवति (साधकतमं करणम्)। कर्तरि करणे च (कर्तृकरणयोस्तृतीया इति पाणिनीय सूत्रेण) तृतीया विभक्तिः भवति। यथा-

(१) जागृतिः **कलमेन** लिखति।

(२) वैशाली **जलेन** मुखं प्रक्षालयति।

(३) रामः **दुग्धेन** रोटिकां खादति।

(४) सुरेन्द्रः **पादाभ्यां** चलति।

(ख) कर्मवाच्यस्य भाववाच्यस्य वा अनुक्तकर्तरि अपि तृतीया विभक्तिः भवति। यथा -

(१) **रामेण** लेखः लिख्यते। (कर्मवाच्ये)

(२) **मया** जलं पीयते। (कर्मवाच्ये)

(३) **तेन** हस्यते। (भाववाच्ये)

**(२)** सह-साकम्-समम्-सार्धम-शब्दानां योगे तृतीया विभक्तिः भवति (सहयुक्तेऽप्रधाने)। यथा -

(१) जनकः **पुत्रेण** सह गच्छति।

(२) सीता **गीतया** साकं पठति।

(३) ते **स्वमित्रैः** सार्धं क्रीडन्ति।

(४) त्वं **गुरुणा** समं वेदपाठं करोषि।

(३) येन विकृतेन अङ्गेन अङ्गिनः विकारो लक्ष्यते तस्मिन् विकृताङ्गे तृतीया भवति (येनाङ्गविकारः)। यथा–

(१) सः **नेत्रेण** काणः अस्ति।

(२) बालकः **कर्णेन** बधिरः वर्तते।

(३) साधुः **पादेन** खञ्जः अस्ति।

(४) श्रेष्ठी **शिरसा** खल्वाटः विद्यते।

(५) सूरदासः **नेत्राभ्याम्** अन्धः आसीत्।

(४) येन चिह्नेन कस्यचिद् अभिज्ञानं भवति तस्मिन् चिह्नवाचिनि शब्दे तृतीया विभक्तिः भवति (इत्थंभूतलक्षणे)। यथा–

(१) सः **जटाभिः** तापसः प्रतीयते।

(२) सः बालकः **पुस्तकैः** छात्रः प्रतीयते।

(५) हेतुवाचिशब्दे तृतीया विभक्तिः भवति (हेतौ) यथा –

(१) **पुण्येन** हरिः दृष्टः।

(२) सः **अध्ययनेन** वसति।

(३) **विद्यया** यशः वर्धते।

(४) विद्या **विनयेन** शोभते।

(६) प्रकृति–आदिक्रियाविशेषणशब्देषु तृतीया विभक्तिः भवति (प्रकृत्यादिभ्यः उपसंख्यानम्)।

(१) सः **प्रकृत्या** साधुः अस्ति।

(२) गणेशः **सुखेन** जीवति।

(३) प्रियंका **सरलतया** लिखति।

(४) मूर्खः **दुःखेन** जीवति।

**(७)** निषेधार्थकस्य अलम् इति शब्दस्य योगे तृतीया विभक्तिः भवति। यथा –

(१) अलं **हसितेन**। अलं **विवादेन**।

**चतुर्थी विभक्तिः**

**(१)** दानस्य कर्मणा कर्ता यं सन्तुष्टं कर्तुम् इच्छति सः सम्प्रदानम् इति कथ्यते (कर्मणा यमभिप्रैति स सम्प्रदानम्), सम्प्रदाने च (चतुर्थी सम्प्रदाने इति पाणिनीयसूत्रेण) चतुर्थी विभक्तिः भवति। यथा –

(१) नृपः **निर्धनाय** धनं यच्छति।

(२) बालकः **स्वमित्राय** पुस्तकं ददाति।

**(२)** रुच्यर्थानां धातूनां प्रयोगे यः प्रीयमाणः भवति तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्तिः भवति (रुच्यर्थानां प्रीयमाणः)। यथा –

(१) **भक्ताय** रामायणं रोचते।

(२) **बालकाय** मोदकानि रोचन्ते।

(३) **गणेशाय** दुग्धं स्वदते।

**(३)** क्रुधादि-अर्थानां धातूनां प्रयोगे यं प्रति कोपादिकं क्रियते तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्तिः भवति (क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः)।

(१) क्रुध् (क्रोध करना) – पिता **पुत्राय** क्रुध्यति।

(२) द्रुह् (द्रोह करना) – किंकरः **नृपाय** द्रुह्यति।

(३) ईर्ष्य् (ईर्ष्या करना) – दुर्जनः **सज्जनाय** ईर्ष्यति।

(४) असूय् (निन्दा करना) – सुरेशः **महेशाय** असूयति।

**(४)** स्पृह् (ईप्सायां) धातोः प्रयोगे यः ईप्सितः भवति तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्तिः भवति (स्पृहेरीप्सितः)। यथा –

(१) स्पृह् (इच्छा करना) – बालकः **पुष्पाय** स्पृहयति।

(५) नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट्, इति शब्दानां योगे चतुर्थी विभक्तिः भवति (नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च)। यथा –

(१) नमः (नमस्कार) – **रामाय** नमः।

(२) स्वस्ति (कल्याण) – **गणेशाय** स्वस्ति।

(३) स्वाहा (आहुति) – **प्रजापतये** स्वाहा।

(४) स्वधा (हवि का दान) – **पितृभ्यः** स्वधा।

(५) वषट् (हवि का दान) – **सूर्याय** वषट्।

(६) अलम् (समर्थ) – **दैत्येभ्यः** हरिः अलम्।

(६) धारयतेः प्रयोगे यः उत्तमर्णः (ऋणदाता) भवति तस्य सम्प्रदानसंज्ञा स्यात्, सम्प्रदाने च चतुर्थी विभक्तिः भवति (धारेरुत्तमर्णः)। यथा –

देवदत्तः **यज्ञदत्ताय** शतं धारयति। (देवदत्त यज्ञदत्त का सौ रुपये का ऋणी है)

(७) यस्मै प्रयोजनाय या क्रिया क्रियते तस्मिन् प्रयोजनवाचिनि शब्दे चतुर्थी विभक्तिः भवति (तादर्थ्ये चतुर्थी वाच्या)। यथा –

(१) सः **मोक्षाय** हरिं भजति।

(२) बालकः **दुग्धाय** क्रन्दति।

**(८)** निम्नलिखितधातूनां योगे प्रायः चतुर्थी विभक्तिः भवति। यथा –

(१) कथय् (कहना) – रामः **स्वमित्राय** कथयति।

(२) निवेदय् (निवेदन करना) – शिष्यः **गुरवे** निवेदयति।

(३) उपदिश् (उपदेश देना) – साधुः **सज्जनाय** उपदिशति।

**पञ्चमी विभक्तिः**

**(१)** अपाये सति यद् ध्रुवं तस्य अपादानसंज्ञा भवति (ध्रुवमपायेऽपादानम्), अपादाने च (अपादाने पञ्चमी इति सूत्रेण) पञ्चमी विभक्तिः भवति। यथा –

(१) **वृक्षात्** पत्रं पतति।

(२) नृपः **ग्रामात्** आगच्छति।

**(२)** भयार्थानां रक्षणार्थानां च धातूनां प्रयोगे भयस्य यद् हेतुः अस्ति तस्य अपादान संज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (भीत्रार्थानां भयहेतुः) यथा –

(१) बालकः **सिंहात्** विभेति।

(२) नृपः **दुष्टात्** रक्षति/त्रायते।

**(३)** यस्मात् नियमपूर्वकं विद्या गृह्यते तस्य शिक्षकादिजनस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (आख्यातोपयोगे)। यथा –

(१) शिष्यः **उपाध्यायात्** अधीते।

(२) छात्रः **शिक्षकात्** पठति।

**(४)** जुगुप्सा-विराम-प्रमादार्थकधातूनां प्रयोगे यस्मात् घृणादि क्रियते तस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्)। यथा –

(१) महेशः **पापात्** जुगुप्सते।

(२) कुलदीपः **अधर्मात्** विरमति।

(३) मोहनः **अध्ययनात्** प्रमाद्यति।

**(५)** भूधातोः यः कर्ता, तस्य यद् उत्पत्तिस्थानम्, तस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (भुवः प्रभावः)। यथा –

(१) गंगा **हिमालयात्** प्रभवति।

(२) **काश्मीरेभ्यः** वितस्ता नदी प्रभवति।

**(६)** जन् धातोः यः कर्त्ता, तस्य या प्रकृतिः (कारणम्=हेतुः) तस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (जनिकर्तुः प्रकृतिः)। यथा –

(१) **गोमयात्** वृश्चिकः जायते।

(२) **कामात्** क्रोधः जायते।

**(७)** कर्ता, यस्मात् अदर्शनम् इच्छति, तस्य कारकस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (अन्तर्धौ येनादर्शनमिच्छति)। यथा–

(१) बालकः **मातुः** निलीयते।

(२) महेशः **जनकात्** निलीयते।

**(८)** वारणार्थानां धातूनां प्रयोगे यः ईप्सितः अर्थः भवति तस्य कारकस्य अपादानसंज्ञा भवति, अपादाने च पञ्चमी विभक्तिः भवति (वारणार्थानामीप्सितः)। यथा –

कृषकः **यवेभ्यः** गां वारयति।

**( ९ )** यदा द्वयोः पदार्थयोः कस्यचित् एकस्य पदार्थस्य विशेषता प्रदर्श्यते तदा विशेषणशब्दैः सह ईयसुन् अथवा तरप् प्रत्ययस्य योगः क्रियते, यस्मात् च विशेषता प्रदर्श्यते तस्मिन् पञ्चमी विभक्तेः प्रयोगः भवति (पञ्चमी विभक्ते)। यथा –

(१) रामः **श्यामात्** पटुतरः अस्ति।

(२) माता **भूमेः** गुरुतरा अस्ति।

(३) जननी जन्मभूमिश्च **स्वर्गात्** अपि गरीयसी।

**( १० )** अधोलिखितशब्दानां योगे पञ्चमी विभक्तिः भवति। यथा –

| | | |
|---|---|---|
| (१) ऋते (बिना) | – | **ज्ञानात्** ऋते मुक्तिः न भवति। |
| (२) प्रभृति (से लेकर) | – | सः **बाल्यकालात्** प्रभृति अद्यावधि अत्रैव पठति। |
| (३) बहिः (बाहर) | – | छात्राः **विद्यालयात्** बहिः गच्छति। |
| (४) पूर्वम् (पहले) | – | **विद्यालयगमनात्** पूर्वं गृहकार्यं कुरु। |
| (५) प्राक् (पूर्व) | – | **ग्रामात्** प्राक् आश्रमः अस्ति। |
| (६) अन्य (दूसरा) | – | **रामात्** अन्यः अयं कः अस्ति। |
| (७) अनन्तरम् (बाद) | – | यशवन्तः **पठनात्** अनन्तरं क्रीडाक्षेत्रं गच्छति। |
| (८) पृथक् (अलग) | – | **नगरात्** पृथक् आश्रमः अस्ति ? |
| (९) परम् (बाद) | – | **रामात्** परम् श्यामः अस्ति। |

**षष्ठी विभक्तिः**

**( १ )** सम्बन्धे षष्ठी विभक्तिः भवति (षष्ठी शेषे)। यथा –

रमेशः **संस्कृतस्य** पुस्तकं पठति।

**( २ )** यदा बहुषु कस्यचित् एकस्य जातिगुणक्रियाभिः विशेषता प्रदर्श्यते तदा विशेषणशब्दैः सह इष्ठन् अथवा तमप् प्रत्ययस्य योगः क्रियते यस्मात् च विशेषता प्रदर्श्यते तस्मिन् षष्ठी विभक्तेः अथवा सप्तमीविभक्तेः प्रयोगः भवति (यतश्च निर्धारणम्)। यथा –

(१) **कवीनां** (कविषु वा) कालिदासः श्रेष्ठः अस्ति।

(२) **छात्राणां** (छात्रेषु वा) सुरेशः पटुतमः अस्ति।

**( ३ )** अधोलिखितशब्दानां योगे षष्ठीविभक्तिः भवति। यथा –

| | | |
|---|---|---|
| (१) अधः (नीचे) | – | **वृक्षस्य** अधः बालकः शेते। |
| (२) उपरि (ऊपर) | – | **भवनस्य** उपरि खगाः सन्ति। |
| (३) पुरः (सामने) | – | **विद्यालयस्य** पुरः मन्दिरम् अस्ति। |
| (४) समक्षम् (सामने) | – | **अध्यापकस्य** समक्षं शिष्यः अस्ति। |
| (५) समीपम् (समीप) | – | **नगरस्य** समीपं ग्रामः अस्ति। |
| (६) मध्ये (बीच में) | – | **पशूनां** मध्ये ग्वालः अस्ति। |

(७) कृते (के लिए) – **बालकस्य** कृते दुग्धम् आनय।

(८) अन्त: (अन्दर) – **गृहस्य** अन्त: माता विद्यते।

**(४)** तुल्यवाचिशब्दानां योगे षष्ठी अथवा तृतीया विभक्तिः भवति (तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्)। यथा –

(१) सुरेशः **महेशस्य** (मेहशेन वा) तुल्यः अस्ति।

(२) सीता **गीतायाः** (गीतया वा) तुल्या विद्यते।

**सप्तमी विभक्तिः**

**(१)** क्रियायाः सिद्धौ यः आधारः भवति तस्य अधिकरणसंज्ञा भवति (आधारोऽधिकरणम्), अधिकरणे च (सप्तम्यधिकरणे च इति सूत्रेण) सप्तमी विभक्तिः भवति। यथा –

(१) नृपः **सिंहासने** तिष्ठति।

(२) वयं **ग्रामे** निवसामः।

(३) **तिलेषु** तैलं विद्यते।

**(२)** यस्मिन् स्नेहः क्रियते तस्मिन् सप्तमी विभक्तिः भवति। यथा –

पिता **पुत्रे** स्निह्यति।

**(३)** संलग्नार्थकशब्दानां चतुरार्थकशब्दानां च योगे सप्तमी विभक्तिः भवति। यथा –

बलदेवः **स्वकार्ये** संलग्नः अस्ति।

जयदेवः **संस्कृते** चतुरः अस्ति।

**(४)** यदा एकक्रियायाः अनन्तरं अपरा क्रिया भवति तदा पूर्वक्रियायाः तस्याश्च कर्तरि सप्तमी विभक्तिः भवति (यस्य च भावेन भावलक्षणम्)। यथा –

(१) **रामे** वनं गते दशरथः प्राणान् अत्यजत्।

(२) **सूर्ये** अस्तं गते सर्वे बालकाः गृहम् अगच्छन्।

## अभ्यासः

**वस्तुनिष्ठप्रश्नाः**

(१) 'अभितः' शब्दस्य योगे विभक्तिः भवति –

(अ) चतुर्थी (ब) पञ्चमी

(स) द्वितीया (द) तृतीया ( )

(२) 'सह' शब्दस्य योगे विभक्तिः भवति –

(अ) तृतीया (ब) चतुर्थी

(स) पञ्चमी (द) षष्ठी ( )

(३) अङ्गविकारे विभक्तिः भवति –

(अ) प्रथमा (ब) द्वितीया

(स) तृतीया (द) सप्तमी ( )

(४) अधस्तनेषु चतुर्थी विभक्तेः कारणम् अस्ति –

(अ) नमः (ब) सह

(स) अभितः (द) प्रति ( )

(५) अधस्तनेषु पंचमीविभक्तेः कारणम् अस्ति –

(अ) नमः (ब) अनन्तरम्

(स) अधोऽधः (द) खल्वाटः ( )

(६) अपादाने विभक्तिः भवति –

(अ)द्वितीया (ब) तृतीया

(स) पञ्चमी (द) षष्ठी ( )

(७) रक्षार्थकधातूनां योगे विभक्तिः भवति –

(अ) षष्ठी (ब) सप्तमी

(स) पंचमी (द) तृतीया ( )

(८) कारकाणां संख्या अस्ति –

(अ) सप्त (ब) अष्ट

(स) षट् (द) नव ( )

(९) सम्बोधने विभक्तिः भवति –

(अ) द्वितीया (ब) प्रथमा

(स) तृतीया (द) षष्ठी ( )

**लघूत्तरात्मकप्रश्नाः**

(१) अधस्तनेषु रेखाङ्कितशब्देषु विभक्तेः कारणं लिखत।

(१) **ग्रामं** परितः क्षेत्राणि सन्ति।

(२) **कविषु** कालिदासः श्रेष्ठः।

(३) **हरये** रोचते भक्तिः।

(४) हरिः **वैकुण्ठम्** अधिशेते।

(५) कृषकः **ग्रामम्** अजां नयति।

(६) साधुः **कर्णाभ्यां** बधिरः अस्ति।

(७) **हिमालयात्** गंगा प्रभवति।

(८) रामः **श्यामाय** शतं धारयति।

(९) **हनुमते** नमः

(२) कोष्ठकगतशब्देषु उचितविभक्तेः प्रयोगं कृत्वा रिक्तस्थानानि पूरयत।

(१) नास्ति .................... समः शत्रुः। (क्रोध)
(२) माता .................... स्निह्यति। (शिशु)
(३) .................... भीतः बालकः क्रन्दति। (चौर)
(४) अलम् ....................। (विवाद)
(५) .................... परितः जलम् अस्ति। (नदी)
(६) .................... रामायणं रोचते। (भक्त)
(७) .................... बहिः छात्राः कोलाहलं कुर्वन्ति। (कक्षा)
(८) भिक्षुकः .................... भिक्षां याचते। (नृप)
(९) जनकः .................... क्रुध्यति। (पुत्र)

(३) कोष्ठकेभ्यः शुद्धम् उत्तरं चित्वा रिक्तस्थानानि पूरयत -

(१) .................... सह सीता वनम् अगच्छत। (रामस्य/रामेण)
(२) सुरेशः .................... पुस्तकं यच्छति। (रामम्/रामाय)
(३) .................... नमः। (रामम्/रामाय)
(४) माता .................... क्रुध्यति। (पुत्रे/पुत्राय)
(५) पिता .................... स्निह्यति। (पुत्रे/पुत्रात्)
(६) .................... अभितः क्षेत्राणि सन्ति। (ग्रामस्य/ग्रामम्)
(७) .................... मोदकाः रोचन्ते। (बालकाय/बालकम्)
(८) बालकः .................... अधिशेते। (पर्यङ्के/पर्यङ्कम्)

(४) अधोलिखितशब्दानां योगे उचितविभक्तिप्रयोगं कृत्वा वाक्यरचनां कुरुत।

(१) विना ..........................................
(२) धिक् ..........................................
(३) बहिः ..........................................
(४) विभेति ..........................................
(५) काणः ..........................................
(६) अन्तरा ..........................................
(७) पटुतरः ..........................................
(८) पटुतमः ..........................................
(९) स्वाहा ..........................................
(१०) उपवसति ..........................................
(११) अधः ..........................................
(१२) कुशलः ..........................................

(५) अधोलिखितवाक्यानि संशोधनीयानि।

(१) राजपुरुष: चौरस्य अनुधावति। ..........................................

(२) ग्रामस्य परित: जलम् अस्ति। ..........................................

(३) साधु: दुर्जनेन जुगुप्सते। ..........................................

(४) अहं रेलयानात् ग्रामं गमिष्यामि। ..........................................

(५) ईश्वरं नम:। ..........................................

(६) अध्यापक: आसनम् तिष्ठति। ..........................................

(७) माम् मिष्टान्नं रोचते। ..........................................

(८) अलं विवादम्। ..........................................

(६) कखण्डं खखण्डेन सह योजयत।

| ''**कखण्ड:**'' | ''**खखण्ड:**'' |
|---|---|
| (१) दाधातुयोगे | (१) षष्ठी |
| (२) रुच्धातुयोगे | (२) तृतीया |
| (३) अङ्गविकारे | (३) चतुर्थी |
| (४) सम्बन्धे | (४) चतुर्थी |
| (५) अधितिष्ठतियोगे | (५) सप्तमी |
| (६) श्रद्धायोगे | (६) द्वितीया |
| (७) प्रमाद्यति धातुयोगे | (७) प्रथमा |
| (८) कर्मवाच्यस्य कर्मणि | (८) पञ्चमी |

# प्रत्ययः

**प्रत्ययस्य परिभाषा** — धातोः प्रातिपदिकस्य वा पश्चात् यस्य प्रयोगः क्रियते सः प्रत्ययः इति कथ्यते।

**प्रत्ययानां भेदाः** - प्रत्ययानां मुख्यरूपेण त्रयो भेदाः सन्ति। ते क्रमशः इमे सन्ति–

(१) कृत् प्रत्ययाः (२) तद्धितप्रत्ययाः (३) स्त्रीप्रत्ययाः।

**१. कृत्-प्रत्ययाः** - येषां प्रत्ययानां प्रयोगः धातोः (क्रियायाः) पश्चात् क्रियते ते कृत् प्रत्ययाः कथ्यन्ते। यथा–

कृ+तव्यत्= कर्त्तव्यम्

पठ्+अनीयर्= पठनीयम्

**२. तद्धितप्रत्ययाः** - येषां प्रत्ययानां प्रयोगः संज्ञासर्वनामादिशब्दानां पश्चात् क्रियते ते तद्धितप्रत्ययाः कथ्यन्ते। यथा–

| | | |
|---|---|---|
| शिव+अण् | = | शैवः |
| उपगु+अण् | = | औपगवः |
| दशरथ+इञ् | = | दाशरथिः |
| धन+मतुप् | = | धनवान् |

**३. स्त्रीप्रत्ययाः** - येषां प्रत्ययानां प्रयोगः पुँल्लिङ्गशब्दान् स्त्रीलिङ्गे परिवर्तयितुं क्रियते ते स्त्रीप्रत्ययाः कथ्यन्ते। यथा–

| | | |
|---|---|---|
| कुमार+ङीप् | = | कुमारी |
| अज+टाप् | = | अजा |

## १. कृत-प्रत्ययाः

### (१) शतृप्रत्ययः

वर्तमानकालार्थे अर्थात् गच्छन् (जाते हुए), लिखन् (लिखते हुए) इत्यस्मिन् अर्थे परस्मैपदिधातुभ्यः शतृप्रत्ययः भवति। अस्य 'अत्' भागः अवशिष्यते; शकारस्य ऋकारस्य च लोपः भवति। शतृप्रत्ययान्तस्य शब्दस्य प्रयोगः विशेषणवत् भवति। अस्य रूपाणि पुँल्लिङ्गे पठत्-वत्, स्त्रीलिङ्गे नदी-वत्, नपुंसकलिङ्गे च जगत्-वत् चलन्ति।

**शतृप्रत्ययान्त-शब्दाः**

| प्रकृतिः | | प्रत्ययः | | शब्दः | पुँल्लिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|---|---|
| पठ् | + | शतृ | = | पठत् | पठन् | पठन्ती | पठत् |
| अस् | + | शतृ | = | सत् | सन् | सती | सत् |
| लिख् | + | शतृ | = | लिखत् | लिखन् | लिखन्ती | लिखत् |
| पच् | + | शतृ | = | पचत् | पचन् | पचन्ती | पचत् |
| दृश् | + | शतृ | = | पश्यत् | पश्यन् | पश्यन्ती | पश्यत् |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| गम् | + | शतृ | = | गच्छत् | गच्छन् | गच्छन्ती | गच्छत् |
| भू | + | शतृ | = | भवत् | भवन् | भवन्ती | भवत् |
| मिल् | + | शतृ | = | मिलत् | मिलन् | मिलन्ती | मिलत् |
| नी | + | शतृ | = | नयत् | नयन् | नयन्ती | नयत् |
| गण् | + | शतृ | = | गणयत् | गणयन् | गणयन्ती | गणयत् |
| चिन्त् | + | शतृ | = | चिन्तयत् | चिन्तयन् | चिन्तयन्ती | चिन्तयत् |
| घ्रा | + | शतृ | = | जिघ्रत् | जिघ्रन् | जिघ्रन्ती | जिघ्रत् |
| दाण् | + | शतृ | = | यच्छत् | यच्छन् | यच्छन्ती | यच्छत् |
| नृत् | + | शतृ | = | नृत्यत् | नृत्यन् | नृत्यन्ती | नृत्यत् |
| पा | + | शतृ | = | पिबत् | पिबन् | पिबन्ती | पिबत् |
| प्रच्छ् | + | शतृ | = | पृच्छत् | पृच्छन् | पृच्छन्ती | पृच्छत् |

**( २ ) शानच् प्रत्ययः**

वर्तमानकालार्थे आत्मनेपदिधातुभ्यः शानच् प्रत्ययः भवति। अस्य शकारस्य चकारस्य च लोपः भवति, 'आन' इति अवशिष्यते। शानच् प्रत्ययान्तस्य शब्दस्य प्रयोगः विशेषणवत् भवति। अस्य रूपाणि पुँल्लिङ्गे रामवत्, स्त्रीलिङ्गे रमावत्, नपुंसकलिङ्गे च फलवत् चलन्ति।

**शानच्प्रत्ययान्त-शब्दाः**

| **प्रकृतिः** | **+** | **प्रत्ययः** | **पुँल्लिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|---|---|
| सेव् | + | शानच् | सेवमानः | सेवमाना | सेवमानम् |
| पच् | + | शानच् | पचमानः | पचमाना | पचमानम् |
| मुद् | + | शानच् | मोदमानः | मोदमाना | मोदमानम् |
| विद्य | + | शानच् | विद्यमानः | विद्यमाना | विद्यमानम् |
| वृत् | + | शानच् | वर्तमानः | वर्तमाना | वर्तमानम् |
| कम्प् | + | शानच् | कम्पमानः | कम्पमाना | कम्पमानम् |
| भास् | + | शानच् | भासमानः | भासमाना | भासमानम् |
| मन् | + | शानच् | मन्यमानः | मन्यमाना | मन्यमानम् |
| मृ | + | शानच् | म्रियमाणः | म्रियमाणा | म्रियमाणम् |
| शुभ् | + | शानच् | शोभमानः | शोभमाना | शोभमानम् |
| कृ | + | शानच् | कुर्वाणः | कुर्वाणा | कुर्वाणम् |
| लभ् | + | शानच् | लभमानः | लभमाना | लभमानम् |
| व्यथ् | + | शानच् | व्यथमानः | व्यथमाना | व्यथमानम् |
| शङ्क् | + | शानच् | शंकमानः | शंकमाना | शंकमानम् |

| | | | | | |
|---|---|---|---|---|---|
| शिक्ष् | + | शानच् | शिक्षमाणः | शिक्षमाणा | शिक्षमाणम् |
| धा | + | शानच् | दधानः | दधाना | दधानम् |
| ब्रू | + | शानच् | ब्रुवाणः | ब्रुवाणा | ब्रुवाणम् |
| यज् | + | शानच् | यजमानः | यजमाना | यजमानम् |
| शी | + | शानच् | शयानः | शयाना | शयानम् |
| दा | + | शानच् | ददानः | ददाना | ददानम् |

**( ३ ) तव्यत्-प्रत्ययः**

तव्यत् प्रत्ययस्य प्रयोगः हिन्दीभाषायाः 'चाहिए' अथवा 'योग्य' इत्यस्मिन् अर्थे भवति। अस्य 'तव्य' भागः अवशिष्यते, तकारस्य च लोपः भवति। अयं प्रत्ययः भाववाच्ये अथवा कर्मवाच्ये एव भवति। तव्यत्-प्रत्ययान्तशब्दानां रूपाणि पुँल्लिङ्गे रामवत्, स्त्रीलिङ्गे रमावत्, नपुंसकलिङ्गे च फलवत् चलन्ति।

**तव्यत्-प्रत्ययान्तशब्दाः**

| **धातुः** | + | **प्रत्ययः** | **पुँल्लिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|---|---|
| पठ् | + | तव्यत् | पठितव्यः | पठितव्या | पठितव्यम् |
| एध् | + | तव्यत् | एधितव्यः | एधितव्या | एधितव्यम् |
| भू | + | तव्यत् | भवितव्यः | भवितव्या | भवितव्यम् |
| दा | + | तव्यत् | दातव्यः | दातव्या | दातव्यम् |
| कृ | + | तव्यत् | कर्त्तव्यः | कर्त्तव्या | कर्त्तव्यम् |
| क्री | + | तव्यत् | क्रेतव्यः | क्रेतव्या | क्रेतव्यम् |
| नी | + | तव्यत् | नेतव्यः | नेतव्या | नेतव्यम् |
| ग्रह् | + | तव्यत् | ग्रहीतव्यः | ग्रहीतव्या | ग्रहीतव्यम् |
| चुर् | + | तव्यत् | चोरयितव्यः | चोरयितव्या | चोरयितव्यम् |
| जि | + | तव्यत् | जेतव्यः | जेतव्या | जेतव्यम् |
| दृश् | + | तव्यत् | द्रष्टव्यः | द्रष्टव्या | द्रष्टव्यम् |
| नम् | + | तव्यत् | नन्तव्यः | नन्तव्या | नन्तव्यम् |
| रक्ष् | + | तव्यत् | रक्षितव्यः | रक्षितव्या | रक्षितव्यम् |
| पच् | + | तव्यत् | पक्तव्यः | पक्तव्या | पक्तव्यम् |
| हन् | + | तव्यत् | हन्तव्यः | हन्तव्या | हन्तव्यम् |
| हस् | + | तव्यत् | हसितव्यः | हसितव्या | हसितव्यम् |
| नृत् | + | तव्यत् | नर्तितव्यः | नर्तितव्या | नर्तितव्यम् |
| पा | + | तव्यत् | पातव्यः | पातव्या | पातव्यम् |

| | | | | | |
|---|---|---|---|---|---|
| श्रु | + | तव्यत् | श्रोतव्य: | श्रोतव्या | श्रोतव्यम् |
| लभ् | + | तव्यत् | लब्धव्य: | लब्धव्या | लब्धव्यम् |
| वृध् | + | तव्यत् | वर्धितव्य: | वर्धितव्या | वर्धितव्यम् |
| क्रुध् | + | तव्यत् | क्रोधितव्य: | क्रोधितव्या | क्रोधितव्यम् |
| स्था् | + | तव्यत् | स्थातव्य: | स्थातव्या | स्थातव्यम् |
| शी् | + | तव्यत् | शयितव्य: | शयितव्या | शयितव्यम् |
| मुद् | + | तव्यत् | मोदितव्य: | मोदितव्या | मोदितव्यम् |

**( ४ ) अनीयर्-प्रत्यय:**

अनीयर् प्रत्यय: तव्यत् प्रत्ययस्य समानार्थक: अस्ति। अस्य प्रयोग: हिन्दीभाषाया: 'चाहिए' अथवा 'योग्य' इत्यर्थे भवति। अस्य 'अनीय' भाग: अवशिष्यते, रेफस्य च लोप: भवति। अयं प्रत्यय: कर्मवाच्ये अथवा भाववाच्ये एव भवति। अनीयर्-प्रत्ययान्त-शब्दानां रूपाणि पुँल्लिङ्गे रामवत्, स्त्रीलिङ्गे रमावत्, नपुंसकलिङ्गे च फलवत् चलन्ति।

**अनीयर्-प्रत्ययान्तशब्दा:**

| **धातु:** | | **प्रत्यय:** | **नपुंसकलिङ्ग:** | **धातु:** | | **प्रत्यय:** | **नपुंसकलिङ्ग:** |
|---|---|---|---|---|---|---|---|
| एध् | + | अनीयर् | एधनीयम् | चुर् | + | अनीयर् | चोरणीयम् |
| भू | + | अनीयर् | भवनीयम् | दृश् | + | अनीयर् | दर्शनीयम् |
| पठ् | + | अनीयर् | पठनीयम् | रक्ष् | + | अनीयर् | रक्षणीयम् |
| दा | + | अनीयर् | दानीयम् | पच् | + | अनीयर् | पचनीयम् |
| क्री | + | अनीयर् | क्रयणीयम् | हस् | + | अनीयर् | हसनीयम् |
| कृ | + | अनीयर् | करणीयम् | गम् | + | अनीयर् | गमनीयम् |
| पूज् | + | अनीयर् | पूजनीयम् | नृत् | + | अनीयर् | नर्तनीयम् |
| ग्रह् | + | अनीयर् | ग्रहणीयम् | | | | |

**२. तद्धित-प्रत्यया:**

**( १ ) मतुप् प्रत्यय:**

'तदस्य अस्ति' (वह इसका है अथवा वाला) अथवा 'अस्मिन्' (इसमें) इत्यर्थे तद्धितस्य मतुप् प्रत्यय: भवति। अस्य 'मत्' भाग: अवशिष्यते, उकारस्य पकारस्य च लोपो भवति। 'मत्' इत्यस्य स्थाने क्वचित् 'वत्' इति भवति। मतुप् प्रत्ययान्तशब्दानां रूपाणि पुँल्लिङ्गे भगवत्-वत्, स्त्रीलिङ्गे ई (ङीप्) प्रत्ययं संयोज्य नदीवत्, नपुंसकलिङ्गे च जगत्-वत् चलन्ति। इदमत्र अवगन्तव्यम् -

❖ 'वत्' इत्यस्य प्रयोग: प्राय: झयन्तशब्देभ्य: अथवा अकारान्तशब्देभ्य: भवति। यथा-

झयन्तेभ्यः - विद्युत्+मतुप्= विद्युत्वत्

अकारान्तेभ्यः - धन+मतुप्= धनवत्

विद्या+मतुप्= विद्यावत्

❖ 'मत्' इत्यस्य प्रयोगः प्रायः इकारान्तशब्देभ्यः भवति। यथा–

श्री + मतुप् - श्रीमत्

बुद्धि + मतुप् + बुद्धिमत्

**मतुप् प्रत्ययान्तशब्दाः**

| **प्रकृतिः** | | **प्रत्ययः** | | **नपुंसकलिङ्गः** | **पुँल्लिङ्गः** | **स्त्रीलिङ्गः** |
|---|---|---|---|---|---|---|
| धन | + | मतुप् | = | धनवत् | धनवान् | धनवती |
| गुण | + | मतुप् | = | गुणवत् | गुणवान् | गुणवती |
| रूप | + | मतुप् | = | रूपवत् | रूपवान् | रूपवती |
| ज्ञान | + | मतुप् | = | ज्ञानवत् | ज्ञानवान् | ज्ञानवती |
| स्पर्श | + | मतुप् | = | स्पर्शवत् | स्पर्शवान् | स्पर्शवती |
| फल | + | मतुप् | = | फलवत् | फलवान् | फलवती |
| हिम | + | मतुप् | = | हिमवत् | हिमवान् | हिमवती |
| गो | + | मतुप् | = | गोमत् | गोमान् | गोमती |
| श्री | + | मतुप् | = | श्रीमत् | श्रीमान् | श्रीमती |
| धी | + | मतुप् | = | धीमत् | धीमान् | धीमती |
| मति | + | मतुप् | = | मतिमत् | मतिमान् | मतिमती |
| लक्ष्मी | + | मतुप् | = | लक्ष्मीवत् | लक्ष्मीवान् | लक्ष्मवती |
| यशस् | + | मतुप् | = | यशस्वत् | यशस्वान् | यशस्वती |
| तडित् | + | मतुप् | = | तडित्वत् | तडित्वान् | तडित्वती |
| विचार | + | मतुप् | = | विचारवत् | विचारवान् | विचारवती |
| स्नेह | + | मतुप् | = | स्नेहवत् | स्नेहवान् | स्नेहवती |
| आयुस् | + | मतुप् | = | आयुष्मत् | आयुष्मान् | आयुष्मती |
| मधु | + | मतुप् | = | मधुमत् | मधुमान् | मधुमती |

**( २ ) इन्- ठन् प्रत्ययौ** - 'अत इनिठनौ' अकारान्ताद् प्रातिपदिकाद् 'तदस्य अस्ति' (वह इसका है) अथवा 'अस्मिन्' (इसमें) इत्यर्थे इनिठनौ प्रत्ययौ भवतः।

**इनि**–प्रयोगकाले 'इनि' प्रत्ययस्य 'इन्' अवशिष्यते, स च प्रथमाविभक्त्यर्थके 'सु' प्रत्यये 'ई' रूपे परिवर्तते। यथा–दण्डम् अस्य अस्तीति= दण्ड+इन्= दण्डिन् सु=दण्डी। **ठन्**– प्रयोगकाले 'ठन्' प्रत्ययस्य 'ठ' इति शिष्यते। ठस्य स्थाने च 'इक' आदेशः ''ठस्येकः'' सूत्रेण जायते।

यथा – दण्डम् अस्य अस्तीति– दण्ड+ठन् (ठ)=दण्ड+इक= दण्डिकः। उदाहरणानि–

| **शब्द** | + | **इनि प्रत्ययः** | | **इनिप्रत्ययान्तः** | **पुँल्लिङ्गशब्दरूपः** |
|---|---|---|---|---|---|
| धन | + | इन् | = | धनिन् | धनी |
| क्रोध | + | इन् | = | क्रोधिन् | क्रोधी |
| दण्ड | + | इन् | = | दण्डिन् | दण्डी |
| बल | + | इन् | = | बलिन् | बली |
| गुण | + | इन् | = | गुणिन् | गुणी |
| सुख | + | इन् | = | सुखिन् | सुखी |
| दुःख | + | इन् | = | दुःखिन् | दुःखी |
| माया | + | इन् | = | मायिन् | मायी |
| शाला | + | इन् | = | शालिन् | शाली |
| माला | + | इन् | = | मालिन् | माली |
| पताका | + | इन् | = | पताकिन् | पताकी |
| वीणा | + | इन् | = | वीणिन् | वीणी |
| वर्ण | + | इन् | = | वर्णिन् | वर्णी |
| पुष्कर | + | इन् | = | पुष्करिन् | पुष्करी |
| ज्ञान | + | इन् | = | ज्ञानिन् | ज्ञानी |
| योग | + | इन् | = | योगिन् | योगी |
| कुमुद | + | इन् | = | कुमुदिन् | कुमुदी |
| पद्म | + | इन् | = | पद्मिन् | पद्मी |
| **शब्द** | + | **ठन्प्रत्ययः** | | **ठन्प्रत्ययान्तः** | **पुँल्लिङ्गरूपः** |
| दण्ड | + | ठन् (इक) | | दण्डिक | दण्डिकः |
| धन | + | ठन् (इक) | | धनिक | धनिकः |
| हिरण्य | + | ठन् (इक) | | हिरण्यक | हिरण्यकः |
| माया | + | ठन् (इक) | | मायिक | मायिकः |
| वर्ण | + | ठन् (इक) | | वर्णिक | वर्णिकः |
| योग | + | ठन् (इक) | | योगिक | योगिकः |
| चर्मन् | + | ठन् (इक) | | चर्मिक | चर्मिकः |
| वर्मन् | + | ठन् (इक) | | वर्मिक | वर्मिकः |
| संज्ञा | + | ठन् (इक) | | संज्ञिक | संज्ञिकः |
| नौ | + | ठन् (इक) | | नाविक | नाविकः |

**( ३ ) त्व-तल् प्रत्ययौ**- 'तस्य भावस्त्वतलौ'- षष्ठीसमर्थात् प्रातिपदिकात् भाव इत्येतस्मिन्नर्थे त्व-तलौ प्रत्ययौ भवत:।

प्रयोगस्थलेषु त्व प्रत्ययान्तशब्दस्य रूपाणि फलवत् नपुंसकलिङ्गमनुसरन्ति।

तथैव तल् प्रत्ययान्तशब्दस्य रूपाणि लतावत् स्त्रीलिङ्गे चलन्ति। यथा-

| **शब्द** | **+** | **त्व/तल् प्रत्ययः** | **त्व प्रत्ययान्तरूपः** | **तल् प्रत्ययान्तरूपः** |
|---|---|---|---|---|
| मनुष्य | + | त्व/तल् | मनुष्यत्वम् | मनुष्यता |
| शिशु | + | त्व/तल् | शिशुत्वम् | शिशुता |
| गुरु | + | त्व/तल् | गुरुत्वम् | गुरुता |
| लघु | + | त्व/तल् | लघुत्वम् | लघुता |
| देव | + | त्व/तल् | देवत्वम् | देवता |
| पशु | + | त्व/तल् | पशुत्वम् | पशुता |
| कृष्ण | + | त्व/तल् | कृष्णत्वम् | कृष्णता |
| जड | + | त्व/तल् | जडत्वम् | जडता |
| दीर्घ | + | त्व/तल् | दीर्घत्वम् | दीर्घता |
| क्षुद्र | + | त्व/तल् | क्षुद्रत्वम् | क्षुद्रता |
| कवि | + | त्व/तल् | कवित्वम् | कविता |
| पटु | + | त्व/तल् | पटुत्वम् | पटुता |
| कृश | + | त्व/तल् | कृशत्वम् | कृशता |

**३. स्त्री-प्रत्ययाः**

**( १ ) टाप् प्रत्ययः**- 'अजाद्यतष्टाप्'- अजादिभ्य: अकारान्तेभ्यश्च प्रातिपदिकेभ्य: स्त्रियां टाप् प्रत्ययो भवति। टाप्प्रत्ययान्तशब्दानां रूपाणि आकारान्ता: स्त्रीलिङ्गे रमा-वत् चलन्ति। यथा-

| **शब्द+टाप् प्रत्ययः** | **टाप्प्रत्ययान्तः शब्दः** | **शब्द+टाप् प्रत्ययः** | **टाप्प्रत्ययान्तः शब्दः** |
|---|---|---|---|
| अज+टाप् | अजा | शूद्र+टाप् | शूद्रा |
| अश्व+टाप् | अश्वा | चटक+टाप् | चटका |
| मन्द+टाप् | मन्दा | वत्स+टाप् | वत्सा |
| ज्येष्ठ+टाप् | ज्येष्ठा | कनिष्ठ+टाप् | कनिष्ठा |
| कृपण+टाप् | कृपणा | क्षत्रिय+टाप् | क्षत्रिया |

❖ टाप्-प्रत्ययान्तशब्देषु क्वचित् अकारस्य इकार: भवति। यथा-

| | | | |
|---|---|---|---|
| मूषक+टाप् | मूषिका | मामक+टाप् | मामिका |
| सर्वक+टाप् | सर्विका | कारक+टाप् | कारिका |
| बालक+टाप् | बालिका | साधक+टाप् | साधिका |

( २ ) **ङीप् प्रत्ययः** - '**ऋन्नेभ्यो ङीप्**' - ऋकारान्तेभ्यः नकारान्तेभ्यश्च प्रातिपदिकेभ्यः (शब्देभ्यः) स्त्रियाम् (स्त्रीलिङ्गे) ङीप् प्रत्ययो भवति।

ङीप् प्रत्ययस्य 'ई' अवशिष्यते। सामान्य-प्रयोगस्थले छात्रैः ङीबन्ताः शब्दाः ईकारान्त-रूपेण स्मर्यन्ते।

| **शब्दः + ङीप् प्रत्ययः** | **ङीबन्ताः शब्दाः** | **शब्दः + ङीप् प्रत्ययः** | **ङीबन्ताः शब्दाः** |
|---|---|---|---|
| कर्तृ + ङीप् | कर्त्री | दण्डिन +ङीप् | दण्डिनी |
| कामिन् +ङीप् | कामिनी | राजन् +ङीप् | राज्ञी |

'**उगितश्च**' - उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति।
येषु प्रत्ययेषु 'उ, ऋ, लृ' इत्येतेषां वर्णानाम् इत्संज्ञकत्वे लोपः जातः ते उगित् प्रत्ययाः। तैः प्रत्ययैः ये शब्दाः निर्मिताः ते उगिदन्ताः शब्दाः प्रातिपादिकाः वा, तेभ्यः उगिदन्तेभ्यः स्त्रियां ङीप् प्रत्ययः स्यात्।

| **शब्दः + ङीप् प्रत्ययः** | **ङीबन्ताः शब्दाः** | **शब्दः + ङीप् प्रत्ययः** | **ङीबन्ताः शब्दाः** |
|---|---|---|---|
| भवतुँ-भवत्+ङीप् | भवती | रूपमतुप-रूपवत् +ङीप् | रूपवती |
| श्रीमतुप्-श्रीमत्+ङीप् | श्रीमती | यजन्तृ-यजन् +ङीप् | यजन्ती |
| बुद्धिमतुप्-बुद्धिमत् + ङीप् | बुद्धिमती | पचन्तृ-पचन् +ङीप् | पचन्ती |

'**टिड्ढाणञ्द्वयसज्दध्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः**'- टित्, ढ, अण्, अञ, द्वयसच्, दध्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप् इत्येवमन्तेभ्यः अनुपसर्जनेभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति। उदाहरणानि-

| **शब्दः + ङीप् प्रत्ययः** | **ङीबन्ताः शब्दाः** | **शब्दः + ङीप् प्रत्ययः** | **ङीबन्ताः शब्दाः** |
|---|---|---|---|
| कुरुचर + ङीप् | कुरुचरी | ऊरुद्वयस् + ङीप् | ऊरुद्वयसी |
| नद + ङीप् | नदी | जानुदध्न + ङीप् | जानुदध्नी |
| मद्रचर + ङीप् | मद्रचरी | ऊरुमात्र + ङीप् | ऊरुमात्री |
| सौपर्णेय + ङीप् | सौपर्णेयी | पञ्चतय + ङीप् | पञ्चतयी |
| वैनतेय + ङीप् | वैनतेयी | आक्षिक + ङीप् | आक्षिकी |
| कुम्भकार + ङीप् | कुम्भकारी | लावणिक + ङीप् | लावणिकी |
| पार्वत + ङीप् | पार्वती | यादृश् + ङीप् | यादृशी |
| औत्स + ङीप् | औत्सी | इत्वर + ङीप् | इत्वरी |

'**वयसि प्रथमे**' - प्रथमे वयसि वर्तमानेभ्यः उपसर्जनरहितेभ्यः अदन्तेभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति। उदाहरणानि-

| **प्रथमवयोवाचकशब्दः + ङीप् प्रत्ययः** | **ङीबन्ताः शब्दाः** |
|---|---|
| कुमार + ङीप् | कुमारी |
| किशोर + ङीप् | किशोरी |

| | |
|---|---|
| वधूट + ङीप् | वधूटी |
| चिरण्ट + ङीप् | चिरण्टी |

**'द्विगोः'** – द्विगुसंज्ञकाद् अनुपसर्जनाद् अदन्तात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति।

अयमर्थः – अदन्ताः ये द्विगुसंज्ञकाः शब्दाः तेभ्यः स्त्रीलिङ्गे ङीप् प्रत्ययः स्यात्। उदाहरणानि–

| **द्विगुसंज्ञकशब्दाः + ङीप् प्रत्ययः** | **ङीबन्ताःशब्दाः** |
|---|---|
| पञ्चानां पूलानां समाहारः पञ्चपूल + ङीप् | पञ्चपूली |
| पञ्चानां मूलानां समाहारः पञ्चमूल + ङीप् | पञ्चमूली |
| त्रयाणां लोकानां समाहारः त्रिलोक + ङीप् | त्रिलोकी |
| अष्टानाम् अध्यायानां समाहारः अष्टाध्याय + ङीप् | अष्टाध्यायी |

# अव्ययम्

संस्कृतभाषायां शब्दप्रकारद्वयमस्ति – विकारी अविकारी च। ये शब्दा: विभक्तिप्रत्यय-उपसर्गैः मिलित्वा रूपपरिवर्तनं कुर्वन्ति ते 'विकारी' इति शब्देन निर्दिश्यन्ते। अविकारिण: तु कदापि रूपपरिवर्तनं न कुर्वन्ति। एते 'अव्यय'-शब्देन कथ्यन्ते। अर्थात् येषु शब्देषु लिङ्गवचनकारकादि-सम्बन्धेन रूपपरिवर्तनं न भवति ते अव्ययानि सन्ति। उक्तं च –

**सदृशं त्रिषु लिङ्गेषु सर्वासु स विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**

अव्ययानां अन्ते आगतानां र्-स्-वर्णानां स्थाने विसर्ग: प्रयुज्यते यथा – उच्चैस्=उच्चै:, नीचैस्=नीचै:, अन्तर्=अन्त:, पुनर्=पुन: इति।

**अव्ययानामपि प्रकारद्वयमस्ति**- प्रथमं तावत् **रूढम्, अव्युत्पन्नं वा**। यथा-च, वा, विना, पृथगादीनि धातो: अव्युत्पन्नानि। द्वितीयं **यौगिकं व्युत्पन्नं वा**। यथा पठित्वा, पठितुमादीनि धातो: व्युत्पन्नानि कृदन्ताव्ययानि। सर्वदा, चतुर्धादीनि नाम्न: व्युत्पन्नानि तद्धिताव्ययानि च। तद्धिताव्ययानां भेदा अपि सन्ति। यथा –
विभक्ति बोधकानि- कुत:, ग्रामत:, कुत्र अत्रादीनि।
कालबोधकानि- यदा, कदा, सर्वदादीनि।
प्रकारबोधकानि- यथा, तथा, कथम्, इत्थम्, द्वेधादीनि।
विविधानि- अनेकश: पञ्चकृत्व आदीनि।

अत्र केषाञ्चिदव्ययानां अर्था: उदाहरणानि च प्रस्तूयन्ते –

| | **अव्ययम्** | **अर्थ:** | **उदाहरणम्** |
|---|---|---|---|
| १. | अपि | १. 'भी' इति भाषायाम्, एवम्, पुन: | अहमपि ग्रामं गच्छमि। |
| | | २. एतदतिरिक्तम् | अस्ति मे सोदरस्नेहोऽप्येतेषु। |
| | | ३. वाक्यारम्भे प्रश्नवाचक: | अपि सन्निहितोऽत्र कुलपति: ? |
| २. | इति | १. शब्दस्वरद्योतक: | कूजन्तं राम रामेति मधुरं मधुराक्षरम्। |
| | | २. कारणद्योत्यार्थे | वैदेशिकोऽस्मीति पृच्छामि। |
| | | (क्योंकि) | पुराणमित्येव न साधु सर्वम्। |
| | | ३. प्रातिपदिकार्थद्योतक: | दिलीप इति राजेन्दु:। |
| | | | अवैमि चैनामनघेति। |
| | | ४. उपसंहारार्थे | इति द्वितीयोऽध्याय:। |
| | | | इति प्रथमोऽङ्क:। |
| ३. | इव | १. उपमार्थक: | वागर्थाविव संपृक्तौ। |
| | | २. उत्प्रेक्षार्थक: | पश्यामीव पिनाकिनम्। |
| | | | लिम्पतीव तमोऽङ्गानि। |

| | | | |
|---|---|---|---|
| ४. | उच्चैः | महत्यर्थे | उच्चैः पर्वताः सन्ति। विपदि उच्चैः स्थेयम्। |
| | | | सः गायकः उच्चैः गायति। उच्चैर्विर्हस्य। |
| ५. | नूनम् | असंदिग्धरूपेण | नूनम् त्वया तत्र गन्तव्यम्। |
| | | निश्चयमेव | नूनं सः सत्यं वदति। |
| ६. | पुरा | पूर्वकाले | पुरा शुक्रमुपस्थाय। |
| | | | पुरा पाटिलिपुत्रनगरे नन्दः नाम राजा आसीत्। |
| ७. | मा | निषेधे | पापे रतिं मा कृथाः |
| | | | क्लैब्यं मा स्म गमः पार्थ!। |
| ८. | सहसा | विचारं विनैव | सहसा विदधीत न क्रियाम्। |
| | | अकस्मात् | अतिथिः सहसा एव गृहमागच्छत्। |
| ९. | बहिः | बाह्यतः, 'बाहर' इति भाषायाम् | ग्रामाद् बहिरुद्यानमस्ति। |
| | | | सः गृहाद् बहिः भ्रमति। |
| १०. | शनैः | मन्दगत्या | सः शनैश्चलितः। |
| ११. | कदा | कस्मिन् समये, 'कब' इति भाषायाम् | सः कदा विद्यालयं गच्छति? |
| १२. | कुतः | कस्मात् स्थानात् | कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्? |
| | | 'कहाँ' से' इति भाषायाम् | कुतः समायातो योगी? |
| १३. | इतस्ततः | 'इधर-उधर' इति भाषायाम् | विलुप्तो बालः इतस्ततः कुत्रापि न प्राप्तः। |
| | | व्यर्थम् | सः इतस्ततः भ्रमति समयं च यापयति। |
| १४. | अत्र | अस्मिन् स्थले | सः अत्र निवसति। |
| | | 'यहाँ' इति भाषायाम् | यत्ने कृते यदि न सिध्यति कोऽत्र दोषः। |
| १५. | तत्र | तस्मिन् स्थले | सः जयपुरे पठति, तत्र एव निवसति। |
| | | 'वहाँ' इति भाषायाम् | |
| | | कारणार्थे (हेत्वर्थे) | निरीतयः यन्मदीयाः प्रजाः। |
| | | | तत्र हेतुस्त्वद् ब्रह्मवर्चसम्।। |
| | | आदरार्थे | तत्रभवान् काश्यपः। |
| १६. | इदानीम् | अधुना, सम्प्रति | दयालः इदानीं क्रीडति। वत्से प्रतिष्ठस्वेदानीम्! |
| १७. | सम्प्रति | अधुना, इदानीम् | सम्प्रति, गम्यतां विद्यालयम्। |
| | | | अयि! सम्प्रति देहि दर्शनम्। |
| १८. | यदा | यस्मिन् काले | यदा सूर्योदयो भवति, सः पाठं पठति। |
| | | 'जब' इति भाषायाम् | पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्। |
| १९. | कदा | कस्मिन् काले | कदा गमिष्यसि? एष गच्छामि। |

| | | | |
|---|---|---|---|
| | | 'कब' इति भाषायाम् | |
| २०. | यथा | येन प्रकारेण | सः यथा वदति तथैव करोति। |
| | | | यथा देवदत्तः तथा विष्णुदत्तः अस्ति। |
| २१. | तथा | तेन प्रकारेण | सः तथा कार्यं करोति। |
| | | | सः यथा वदति तथा करोति। |
| २२. | विनाः | विहीनः | ज्ञानं विना न मुक्तिः। |
| | | अभावः | यथा तानं विना रागो, यथा मानं विना नृपः। |
| | | | यथा दानं विना हस्ती, तथा ज्ञानं विना यतिः।। |
| २३. | श्वः | आगामि दिवसः | अहं श्वः जयपुरं गमिष्यामि। |
| | | | वरमद्य कपोतो न श्वो मयूरः। |
| २४. | ह्यः | गते अहनि | अहं ह्यः भरतपुरम् अगच्छम्। |
| | | व्यतीतः दिवसः | सः ह्यः पाठम् अपठत्। |
| २५. | अधुना | इदानीम्, सम्प्रति, अस्मिन् काले | अधुना बालाः पठन्ति। |
| २६. | कदापि | 'कभी' इति भाषायाम् | कदापि अधर्मं न आचरेत्। |
| | | | सः कदापि न रोदिति। |
| २७. | किम् | दोषार्थकः निन्दार्थे वा | हितान्न यः संश्रृणुते स किं प्रभुः, |
| | | | स किं सखा साधु न शास्ति योऽधिपम्। |
| | | | सः किं पठति। (अनध्यायप्रियः इति) |
| २८. | यत् | येन केन प्रकारेण | यत् किञ्चिदेतत्। |
| | | यद्यपि | वक्रः पन्था यदपि भवतः ......। |
| | | ''क्योंकि'' इति | रामोऽवदत् यत् सः सर्वम् अपश्यत्। |
| | | भाषायाम् | रामः सत्यं वदति यत् सः सर्वम् अपश्यत्। |
| २९. | यावत् | ''जितना'' इति भाषायाम्, | यावद् दत्तम्, तावद् भुक्तम्। |
| | | मर्यादायाम्, | गङ्गदत्तः सर्पकोटरं यावत् अगच्छत्। |
| | | पर्यन्तम्, | एकस्य दुःखस्य न यावदत्तं गच्छामि, |
| | | (तावत्–सहसम्बन्धी) | तावत् द्वितीयं समुपस्थितं मे। |
| | | | यावत् वित्तोपार्जन सक्तः, |
| | | | तावत् निजपरिवारो रक्तः। |
| ३०. | तावत् | 'उतना' इति भाषायाम् | यादव् दत्तम्, तावद् भुक्तम्। |
| | | पूर्वम् | आर्ये इतस्तावदागम्यताम्। |
| | | वस्तुतः | दृढस्तावद्बन्धः |
| | | निस्सन्देहः | त्वमेव तावत्प्रथमो राजद्रोही। |

# वाच्यपरिवर्तनम्

संस्कृत-भाषायां, सर्वासु भारतीयभाषासु, अन्यासु च भारोपीयभाषासु वाच्यस्य महत्त्वपूर्णं स्थानं वर्तते। वाच्यस्य सम्यग्ज्ञानं विना भाषाया: आकार: न अवगम्यते।

संस्कृतभाषायां त्रीणि वाच्यानि भवन्ति — कर्तृवाच्यं, कर्मवाच्यं, भाववाच्यं च। क्रियया कथितं कथनप्रकारम् वाच्यम्। कर्तृ-कर्म-भावेषु क्रियया एक: कथ्यते। अत: क्रिया कर्तृवाच्ये, कर्मवाच्ये, भाववाच्ये वा भवति।

'पठति' इति कथिते सति प्रश्न: समुदेति यत् 'क: पठति?' अस्य उत्तररूपेण कथ्यते- 'कोऽपि पठनकर्त्ता पठति' इति। अनेन प्रकारेण अत्र क्रियया कर्त्ता सूच्यते, अत: 'पठति' इत्यत्र कर्तृवाच्यमस्ति। अन्यत: 'पठ्यते' इति कथिते सति प्रश्न: समुदेति 'किम् पठ्यते' इति। उत्तररूपेण कथयितुं शक्यते यत् कोऽपि ग्रन्थ: किमपि पुस्तकं वा पठ्यते। अनेन स्पष्टं यत् अत्र पठ्यते क्रियया कर्म उच्यते। अत: 'पठ्यते' इत्यत्र कर्मवाच्यमस्ति। कर्तृवाच्यं तु सकर्मकाकर्मकाणां सर्वासामेव क्रियाणां भवति, किन्तु कर्मवाच्यं सकर्मकक्रियाणामेव भवितुं शक्यते, तत्र कर्मण: सद्भावात्। यासां क्रियाणां कर्म न भवति ता: अकर्मकक्रिया: कथ्यन्ते, यथा 'हस्', 'शी' इत्यादय:। संस्कृतभाषायां अकर्मकक्रियाभि: भाववाच्यं कर्तृवाच्यं च भवति। तत्र कर्मण: अविद्यमानत्वात् कर्मवाच्यं कर्तुं न शक्यते। उदाहरणार्थं 'स्वप्' अकर्मक अस्ति। तत्र भाववाच्यं 'सुप्यते' भविष्यति। भावस्य अर्थ अस्ति 'क्रिया'। अर्थात्- 'सुप्यते' पदेन नैव कर्त्ता कथ्यते नापि कर्म कथ्यते, अपितु क्रिया एव कथ्यते। अत: 'सुप्यते' भाववाच्यमस्ति। सामान्यरूपेण अत्र वाच्यानां स्वरूपं प्रदर्शितम्।

वाक्यरचनाविशेषे वाच्यानुसारिण: केचन नियमा: सन्ति, तेषां ज्ञानं वाक्यरचनायै आवश्यकम्।

**कर्तृवाच्यम्** —

कर्तृवाच्ये कर्तु: प्राधान्यं भवति, अत: क्रिया लिङ्गपुरुषवचनेषु कर्तारमनुसरति। तद्यथा- बालक: विद्यालयं गच्छति। बालकौ विद्यालयं गच्छत:। बालका: विद्यालयं गच्छन्ति। त्वं किं करोषि? युवां किं कुरुथ:? यूयं किं कुरुथ? अहं ग्रन्थं पठामि। आवां ग्रन्थौ पठाव:। वय ग्रन्थान् पठाम:। उक्तञ्च —

**कर्तरि प्रथमा यत्र द्वितीयाऽथ च कर्मणि।**
**कर्तृवाच्यं भवेत् तत्तु क्रिया कर्त्रनुसारिणी।।**

**कर्मवाच्यम्** —

अत्र कर्मण: प्राधान्यं भवति। अत: क्रिया लिङ्गपुरुषवचनेषु कर्मानुसारिणी। कर्तृवाच्यस्य कर्त्ता कर्मवाच्ये तृतीया विभक्तौ भवति कर्म च प्रथमा-विभक्तौ भवति। अत्र सर्वा: धातव: आत्मनेपदिन: भवन्ति, मध्ये 'य' युज्यते च। तद्यथा- छात्रेण विद्यालय: गम्यते। छात्राभ्यां पुस्तके पठ्येते। अस्माभि: पद्यानि पठ्यन्ते। तदुक्तम —

**कर्मणि प्रथमा यत्र तृतीयाऽथ कर्तरि।**
**कर्मवाच्यं भवेत् तत्तु क्रिया कर्मानुसारिणी।।**

संस्कृतभाषायां कर्मवाच्यस्य, भाववाच्यस्य च प्रयोगः बहुशः क्रियते।

**भाववाच्यम्** —

अकर्मकधातूनां कर्मवाच्यसदृशं रूपं यस्मिन् प्रयोगे दृश्यते सः भाववाच्य-प्रयोगः। अत्र क्रिया केवलं भावं सूचयति। अतः सा सदैव केवलं प्रथमपुरुषैकवचने प्रयुज्यते। सा कर्तुः लिङ्गपुरुषवचनानि नैव अनुसरति। यत्र लिङ्गम् अपेक्षितं तत्र नपुंसकलिङ्गैकवचनमेव प्रयुज्यते। कृदन्ते क्रिया-प्रयोगे कृते सति सा नपुंसकलिङ्गप्रथमैकवचने एव स्यात्। भाववाच्ये प्रथमाविभक्त्यन्त पदं नैव दृश्यते। भाववाच्येऽपि कर्त्ता तृतीयाविभक्तौ भवति। तद्यथा —

| | | | |
|---|---|---|---|
| तेन | ताभ्याम् | तैः | |
| अनेन | आभ्याम् | एभिः | अन्यपुरुषः पुल्लिङ्गे |
| भवता | भवद्भ्याम् | भवद्भिः | |
| | | | |
| तया | ताभ्याम् | ताभिः | |
| अनया | आभ्याम् | आभिः | अन्यपुरुषः स्त्रीलिङ्गे |
| भवत्या | भवतीभ्याम् | भवतीभिः | |
| | | | |
| त्वया | युवाभ्याम् | युष्माभिः | मध्यपुरुषः |
| मया | आवाभ्याम् | अस्माभिः | उत्तमपुरुषः |

- जायते/खेल्यते/हस्यते/सुप्यते/म्रियते/जातम्/खेलितम्/हसितम्/सुप्तम्/मृतम्। तदुक्तम् यथा —

**भावाच्ये क्रिया वक्ति न कर्त्तारं न कर्म च।**
**तत्र कर्त्ता तृतीयायां क्रिया भावानुसारिणी।।**
**भावे तु कर्मवाच्यक्रियैकवचने प्रथमपुरुषे।**
**सा चेद्भवेद्कृदन्ता क्लीबप्रथमैकवचने स्यात्।।**

**अकर्मकधातवः सन्तिः** —

लज्ज्, भू, स्था, जागृ, वृध्, क्षि, भी, जीव्, मृ, कुट्, कण्ठ्, भ्रम्, यत्, ग्लौ, जॄ, कृप्, च्युत्, शम्, ध्वन्, मस्ज्, कद्, जृम्भ्, रम्भ्, रुद्, हस्, शी, क्रीड्, रुच्, दीप् इति इमे; एतत्समानार्थकधातवश्च। पद्ये उपर्युक्तधातूनां परिगणनं निम्नप्रकारेण कृतम् —

**लज्जासत्तास्थितिजागरणं, वृद्धिक्षयभयजीवितमरणम्।**
**कौटिल्यौत्सुक्यभ्रमयत्नग्लानिजरा सामर्थ्यक्षरणम्।।**
**शान्तिध्वनिमज्जनवैकल्यं, जृम्भणरम्भणरोदनहसनम्।**
**शयनक्रीडारुचिदीप्त्यर्थं, धातुगणं तमकर्मकमाहुः।।**

एतदतिरिक्तान्यधातवः तु सकर्मकाः एव। अत्र कर्तृकर्मानुसारिणी कर्तृकर्मवाच्ययोः तालिका प्रस्तूयते। अनया तालिकया वाच्यपरिवर्तनाभ्यासः कर्त्तव्यः —

| **कर्तृवाच्यम्** | **कर्मवाच्यम्** |
|---|---|
| भवान् /सः पठति। | भवता/तेन पठ्यते। |
| भवन्तौ/तौ पठतः। | भवद्भ्याम्/ताभ्यां पठ्यते। |
| भवन्तः/ते पठन्ति। | भवद्भिः/तैः पठ्यते। |
| भवती/सा पठति। | भवत्या/तया/ पठ्यते। |
| भवत्यौ/ते पठतः। | भवतीभ्याम्/ताभ्याम् पठ्यते। |
| भवत्यः/ताः पठन्ति। | भवतीभिः/ताभिः पठ्यते। |
| त्वं पठसि। | त्वया पठ्यते। |
| युवाम् पठथः। | युवाभ्याम् पठ्यते। |
| यूयम् पठथ। | युष्माभिः पठ्यते। |
| अहं पठामि। | मया पठ्यते। |
| आवाम् पठावः। | आवाभ्याम् पठ्यते। |
| वयम् पठामः। | अस्माभिः पठ्यते। |
| एषः/अयं बालकः पठति। | एतेन/अनेन बालकेन पठ्यते। |
| एषा/इयं बालिका पठति। | एतया/अनया बालिकया पठ्यते। |
| एतौ/इमौ बालकौ पठतः। | एताभ्यां/आभ्यां बालकाभ्यां पठ्यते। |
| एते/इमे बालिके पठतः। | एताभ्यां/आभ्यां बालिकाभ्यां पठ्यते। |
| एते/इमे बालकाः पठन्ति। | एतैः/एभिः बालकैः पठ्यते। |
| एताः/इमाः बालिकाः पठन्ति। | एताभिः/आभिः बालिकाभिः पठ्यते। |
| अहं श्लोकं पठामि। | मया श्लोकः पठ्यते। |
| अहं श्लोकौ पठामि। | मया श्लोकौ पठ्येते। |
| अहं श्लोकान् पठामि। | मया श्लोकाः पठ्यन्ते। |
| अहं पुस्तकं पठामि। | मया पुस्तकं पठ्यते। |
| अहं पुस्तके पठामि। | मया पुस्तके पठ्येते। |
| अहं पुस्तकानि पठामि। | मया पुस्तकानि पठ्यन्ते। |
| अहं कथां पठामि। | मया कथा पठ्यते। |
| अहं कथे पठामि। | मया कथे पठ्येते। |
| अहं कथाः पठामि। | मया कथाः पठ्यन्ते। |

लट्लकारे कतिपयधातूनां कर्मवाच्यरूपाणि (प्रथम-पुरुषे) अत्र प्रस्तूयन्ते। अन्यधातूनां रूपाणि अनेन प्रकारेण निर्मातुं शक्यन्ते —

## लट्लकारः

| धातवः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| बुध् | बुध्यते | बुध्येते | बुध्यन्ते |
| गम् | गम्यते | गम्येते | गम्यन्ते |
| कृ | क्रियते | क्रियेते | क्रियन्ते |
| लभ् | लभ्यते | लभ्येते | लभ्यन्ते |
| दा | दीयते | दीयेते | दीयन्ते |
| पा | पीयते | पीयेते | पीयन्ते |
| गै-गा | गीयते | गीयेते | गीयन्ते |
| नी | नीयते | नीयेते | नीयन्ते |
| श्रू | श्रूयते | श्रूयेते | श्रूयन्ते |
| स्मृ | स्मर्यते | स्मर्येते | स्मर्यन्ते |
| भू | भूयते | भूयेते | भूयन्ते |
| स्था | स्थीयते | स्थीयेते | स्थीयन्ते |
| आस् (सीद्) | आस्यते | आस्येते | आस्यन्ते |
| हस् | हस्यते | हस्येते | हस्यन्ते |
| शीङ् | शय्यते | शय्येते | शय्यन्ते |

भाववाच्ये क्रिया प्रथमपुरुषैकवचने एव प्रयुज्यते।

## घटिकाचित्रसाहाय्येन समय-लेखनम्

(सामान्य-सपाद-सार्ध-पादोन इत्यादयः)

**संस्कृत-भाषा-व्यवहारे घटिका-सम्बन्धि-कालसूचक-शब्दानां प्रयोगः अतीव सरलः भवति, तदेव अत्र प्रदर्श्यते। आदौ तावत् सामान्य-समयलेखनम् इत्युक्ते पूर्ण-समयलेखनं कथमिति दर्श्यते-**

### सामान्यम् ( पूर्णम् )

**घटिका-चित्रम्** **घटिका-चित्रम्**



राम: प्रातः **पञ्चवादने** उत्तिष्ठति।

(राम प्रातः पाँच बजे उठता है।)



रमा **नववादने** विद्यालयं गच्छति।

(रमा नौ बजे विद्यालय जाती है।)



कृष्णः **एकादशवादने** लेखम् अलिखत्।

(कृष्ण ने ग्यारह बजे लेख लिखा।)



कृष्णा **सप्तवादने** गृहकार्यं करोति।

(कृष्णा सात बजे घर का काम करती है।)



कृष्णा **त्रिवादने** विद्यालयात् आगच्छति।

(कृष्णा तीन बजे विद्यालय से आती है।)



अनसूया **षड्वादने** मन्दिरं गच्छति।

(अनसूया छः बजे मन्दिर जाती है।)



विमला **दशवादने** शयनं करोति।

(विमला दस बजे सोती है।)



सा प्रातः **द्विवादने** स्वप्नं पश्यति।

(वह प्रातः दो बजे स्वप्न देखती है।)

## सपाद-सार्ध-पादोन

**चतुर्थांशः 'पाद' इति अर्धांशः च 'अर्ध' इति कथ्यते। अतो हि 'सवा' इत्यस्य कृते संस्कृते 'सपाद' इति, 'साढ़े' इत्यस्य कृते 'सार्ध' इति, 'पौन' इत्यस्य कृते च 'पादोन' इति शब्दः प्रयुज्यते। यथा-**

| | |
|---|---|
| अब सवा चार बजे हैं। | अधुना **सपादचतुर्वादनम्** अस्ति। |
| अब साढ़े चार बजे हैं। | अधुना **सार्धचतुर्वादनम्** अस्ति। |
| अब पौने चार बजे हैं। | अधुना **पादोनचतुर्वादनम्** अस्ति। |

**एकैकां घटिकां दृष्ट्वा तत्सम्बद्ध-वाक्यं च पठित्वा वदन्तु यत् कः कः कतिवादने किं किं करोति-**

**अनिलः**



अनिलः कदा उत्तिष्ठति।

(अनिल कब उठता है ?)

अनिलः **सार्धचतुर्वादने** उत्तिष्ठति।

(अनिल साढ़े चार बजे उठता है।)

**रमा**



रमा कदा उत्तिष्ठति

(रमा कब उठती है ?)

रमा **सपादचतुर्वादने** उत्तिष्ठति

(रमा सवा चार बजे उठती है।)

**सुधा**



सुधा कदा उत्तिष्ठति

(सुधा कब उठती है ?)

सुधा **पादोनपञ्चवादने** उत्तिष्ठति।

(सुधा पौने पाँच बजे उठती है।)

**राकेशः**



राकेशः कदा भ्रमणाय गच्छति ?

राकेशः पादोन **पञ्चवादने** भ्रमणाय गच्छति।

(राकेश पौने पाँच बजे सैर को जाता है।)

**मदनः**



मदनः कदा भ्रमणाय गच्छति ?

मदनः **सार्धपञ्चवादने** भ्रमणाय गच्छति।

(मदन साढ़े पाँच बजे सैर को जाता है।)

**पङ्कजः**



पङ्कजः कदा भ्रमणाय गच्छति ?

पङ्कजः **सपादपञ्चवादने** भ्रमणाय गच्छति।

(पङ्कज सवा पाँच बजे सैर को जाता है।)

**आनन्दः**



आनन्दः कदा व्यायामं करोति ?

आनन्दः **पादोनषड्वादने** व्यायामं करोति।

(आनन्द पौने छः बजे व्यायाम करता है।)

**राजेशः**



राजेशः कदा स्नानादिकं करोति ?

राजेशः **सार्धषड्वादने** स्नानादिकं करोति।

(राजेश साढ़े छः बजे स्नानादि करता है।)

**देवदत्तः**



देवदत्तः कदा प्रातराशं करोति ?

देवदत्तः **सपादसप्तवादने** प्रातराशं करोति।

(देवदत्त सवा सात बजे अल्पाहार करता है।)

**कला / निमेषः**

**'मिनिट' इत्यस्य कृते 'कला' अथवा 'निमेषः' इति शब्दस्य प्रयोगः भवति। '५.१० वादनम्' इति अर्थं बोधयितुं अङ्कानां स्थाने दश कलोत्तर-पञ्चवादनम् / दश निमेषोत्तर-पञ्चवादनम् / दश कलाधिक पञ्चवादनम् / दश निमेषाधिक-पञ्चवादनम् / दशोत्तर-पञ्चवादनम् / दशाधिक-पञ्चवादनम् वा इत्येवं शब्दप्रयोगः क्रियते। इदानीम उदाहरणानि पश्यन्तु –**

कलामः



कलामः **अष्टकलोत्तर-नववादने** गच्छति।

(कलाम नौ बजकर आठ मिनट पर जाता है।)

हामिदः



हामिदः **विंशत्युत्तर-द्वादशवादने** स्वपिति।

(हामिद बारह बजकर बीस मिनट पर सोता है।)

**समयबोधकानि अन्यवाक्यानि**

| | |
|---|---|
| आपको दो बजे अवश्य जाना है। | भवता **द्विवादने** अवश्यं गन्तव्यम् अस्ति। |
| ठीक तीन बजे एक बस छूटती है। | **त्रिवादने** एकं बसयानं गच्छति। |
| क्या तुम पौने छः बजे मिलते हो ? | किं त्वं **पादोन षड्वादने** मिलसि ? |
| मैं साढ़े पाँच बजे घर पर ही रहता हूँ। | अहं **सार्धपञ्चवादने** गृहे एव तिष्ठामि। |
| संस्कृत-वार्ता प्रसार कब होता है ? | संस्कृतवार्ताप्रसारः **कदा** भवति ? |
| ढाई घण्टे का कार्यक्रम है। | **सार्धद्विघण्टात्मकः** कार्यक्रमः। |
| क्या दस बज गए ? | किम **दशवादनम्** जातम् ? |
| मैं छः बजे से सात बजे तक पढ़ता हूँ। | अहं **षड्वादनतः सप्तवादनपर्यन्तं** पठामि। |
| अब तीन बजने में पाँच मिनट है। | अधुना **पञ्चन्यूनत्रिवादनम्** अस्ति। |
| अब चार बजकर दस मिनट है। | अधुना **दशाधिकचतुर्वादनम्** अस्ति। |
| अब छः बजकर चालीस मिनट है। | अधुना **चत्वारिंशदधिकषड्वादनम्** अस्ति। |
| सवा बजे लिखता है। | **सपादैक-वादने** लिखति। |
| सात बजकर चालीस मिनट पर कहता है। | **चत्वारिंशत्यधिक-सप्तवादने** कथयति। |
| अब आठ बजकर पचास मिनट हुए हैं। | अधूना **पञ्चाशदधिक-अष्टवादनम्** अस्ति। |
| चार बजे से छः बजे तक खेलता है। | **चतुर्वादनतः षड्वादन-पर्यन्तं** क्रीडति। |
| तस्लीमा नसरीन सवा बारह बजे बोलती है। | तस्लीमा नसरीनः **सपाद-द्वादशवादने** भाषते। |

## अभ्यास प्रश्नाः

**प्रश्नः १.** स्वकीयां दिनचर्यां लेखितुं रिक्तस्थानानां पूर्तिम् उचितपदैः कुरुत–

प्रातः अहं ............... उत्तिष्ठामि। उत्थाय अहं ............... भ्रमणाय गच्छामि। अहं ................. तः ..............पर्यन्तं विद्यालयं तिष्ठामि। अहं मध्याह्ने ............... वादने भोजनं करोमि। तदनन्तरं ................... तः ............. पर्यन्तं विश्रामं करोमि। ............... तः ............... पर्यन्तं गृहकार्यं करोमि। .............................. तः ....................... पर्यन्तं क्रीडामि। ....................... रात्रिभोजनं करोमि। रात्रौ .................. तः .......................... पर्यन्तम् अध्ययनं कृत्वा ........... शयनाय गच्छामि।

**प्रश्नः २.** विद्यालयस्य समयसारिणीम् उचित समयवाचकैः पदैः पूरयित्वा लिखत –

| | |
|---|---|
| ७.३० प्रातः | प्रातः ...................... वादने प्रार्थना। |
| १०.०० प्रातः | प्रातः ...................... अर्धावकाशः। |
| १०.१५ प्रातः | प्रातः ..................... वादने पञ्चमः कालांशः। |
| १२.४५ अपराह्ने | अपराह्ने ................. वादने पूर्णः अवकाशः। |

**प्रश्नः ३.** दीपावल्युत्सवस्य अधोलिखिते कार्यक्रमे अङ्कानां स्थाने शब्दैः समयं लिखत –

सायं (७.३०) .................. वादने सामुदायिक–भवने आगमनम्।
सायं (८.००) .................. वादने कवितापाठः।
रात्रौ (९.१५) .................. वादने प्रीतिभोजनम्।
रात्रौ (९.४५) .................. वादने प्रसादवितरणम्, प्रस्थानं च।

**प्रश्नः ४.** अधोलिखितसारिण्याम् अङ्कानां स्थाने संस्कृतपदैः समयम् लिखत–

प्रातः (६.३०) .................. वादने ईशवन्दना।
प्रातः (७.४५) .................. वादने उपाहारः।
प्रातः (८.१५) .................. वादने संस्कृतसम्भाषणाभ्यासः।
प्रातः (११.००) ................ वादने वर्तनी–संशोधनम्।

**प्रश्नः ५.** अधस्तन–घटिका–चित्राणि दृष्ट्वा समयं लिखत–

   

.............................. .............................. .............................. ..............................

# अशुद्धि-संशोधनम्

शुद्धिः कस्मै न रोचते? यथा जीवने आहार-व्यवहारादिषु सर्वत्र शुद्धिः अपेक्षिता भवति तथैव भाषा-व्यवहारेऽपि शुद्धिः इष्यते। संस्कृतेन भाषण-पठन-लेखनादिव्यवहारः क्रियते चेत् शुद्धिः सविशेषम् आवश्यिकी।

संस्कृते कारक-विभक्ति-समास-सन्धि-प्रत्यय-लिङ्गादेः सम्यक् ज्ञानाभावाद् अशुद्धयः भवन्ति। तन्निवारणाय अभ्यासः करणीयः इति कानिचन उदाहरणानि अत्र दीयन्ते।

## विभक्ति-विषयकम् अशुद्धि-संशोधनम्

| **अशुद्धम्** | **शुद्धम्** |
| --- | --- |
| कृष्णम् इति वसुदेवपुत्रः। | कृष्णः इति वसुदेवपुत्रः। |
| विष्णुः वैकुण्ठे अधिशेते। | विष्णुः वैकुण्ठमधिशेते। |
| सज्जनः आसने अधितिष्ठति। | सज्जनः आसनमधितिष्ठति। |
| ग्रामस्य परितः वृक्षाः सन्ति। | ग्रामं परितः वृक्षाः सन्ति। |
| नगरस्य निकषा उपवनमस्ति। | नगरं निकषा उपवनमस्ति। |
| गुरुजनस्य अनुसरति। | गुरुजनम् अनुसरति। |
| रामस्य सह सीता वनमगच्छत्। | रामेण सह सीता वनमगच्छत्। |
| नेत्रात् काणः। | नेत्रेण काणः। |
| पादस्य खञ्ज। | पादेन खञ्जः |
| जटाभ्यः तापसोऽस्ति। | जटाभिः तापसोऽस्ति। |
| विवादात् अलम्। | विवादेन अलम्। |
| कलहात् किम्। | कलहेन किम्। |
| भिक्षुकं वस्त्राणि यच्छति। | भिक्षुकाय वस्त्राणि यच्छति। |
| मां रूप्यकाणि देहि। | मह्यं रूप्यकाणि देहि। |
| बालकं फलं रोचते। | बालकाय फलं रोचते। |
| रमा दुग्धं स्वदते। | रमायै दुग्धं स्वदते। |
| राजा भृत्ये क्रुध्यति। | राजा भृत्याय क्रुध्यति |
| बालकं स्वस्ति। | बालकाय स्वस्ति। |
| जनकं नमः। | जनकाय नमः। |
| सः शिक्षकं निवेदयति। | सः शिक्षकाय निवेदयति। |
| वृक्षेण पत्राणि पतन्ति। | वृक्षात् पत्राणि पतन्ति। |
| हिमालये गंगा निर्गच्छति। | हिमालयात् गंगा निर्गच्छति। |
| पापेन विरमति। | पापात् विरमति। |
| सत्यं मा प्रमद। | सत्यात् मा प्रमद। |

| | |
|---|---|
| बाल: सिंहेन विभेति। | बाल: सिंहात् विभेति। |
| रक्षक: चौराय त्रायते। | रक्षक: चौरात् त्रायते। |
| शिक्षकेण गणितं पठति। | शिक्षकात् गणितं पठति। |
| आचार्याय अधीते। | आचार्याद् अधीते। |
| लोभेन क्रोधो भवति। | लोभात् क्रोधो भवति। |
| बीजे पादप: जायते। | बीजात् पादप: जायते। |
| माता गुरुतरा भूमि:। | माता गुरुतरा भूमे:। |
| पठनस्य अनन्तरम्। | पठनाद् अनन्तरम्। |
| केन हेतु: वसति। | केन हेतुना वसति। |
| वृक्षे उपरि काक: तिष्ठति। | वृक्षस्य उपरि काक: तिष्ठति। |
| वृक्षेभ्य: अध: छाया। | वृक्षाणाम् अध: छाया। |
| भोजनेन कृते गच्छामि। | भोजनस्य कृते गच्छामि। |
| कटम् आस्ते। | कटे आस्ते। |
| कविभि: कालिदास: श्रेष्ठ:। | कविषु कालिदास: श्रेष्ठ:। |
| पिता पुत्रस्य स्निह्यति। | पिता पुत्रे स्निह्यति। |
| स रामस्य विश्वसिति। | स रामे विश्वसिति। |
| मृगस्य बाणं क्षिपति। | मृगे बाणं क्षिपति। |
| रमा कार्यस्य कुशला। | रमा कार्ये कुशला। |
| महेश: कार्येण संलग्न:। | महेश: कार्ये संलग्न:। |
| श्याम: गायनात् दक्ष:। | श्याम: गायने दक्ष:। |
| विद्या बुद्धि: वर्धते। | विद्यया बुद्धि: वर्धते। |
| बालकं मोदकं भृशं रोचते। | बालकाय मोदकं भृशं रोचते। |
| शिक्षकाय समक्षं छात्र: पाठ: पठति। | शिक्षकस्य समक्षं छात्र: पाठं पठति। |
| बालेऽस्य स्निह्यति मे मन:। | बालेऽस्मिन् स्निह्यति मे मन: |

## लिङ्ग-पुरुष-वचन-लकारविषयकम् अशुद्धि-संशोधनम्

| **अशुद्धम्** | **शुद्धम्** |
|---|---|
| स: बालक पश्यसि। | स: बालकं पश्यति। |
| बालक: गच्छत:। | बालक: गच्छति। |
| राम: हसामि। | राम: हसति। |
| छात्रा लिखसि। | छात्रा लिखति। |
| अहं गच्छति। | अहं गच्छामि। |
| त्वं पियामि। | त्वं पिबसि। |

| | |
|---|---|
| वयं हसाव:। | वयं हसाम:। |
| छात्रौ वदन्ति। | छात्रा: वदन्ति। |
| स: कलमात् लिखति। | स: कलमेन लिखति। |
| स: बालक यच्छति। | स: बालकाय यच्छति। |
| स: रामस्य सह गच्छति। | स: रामेण सह गच्छति। |
| भवान् कुत्र गच्छन्ति? | भवान् कुत्र गच्छति? |
| यूयं पठ। | यूयं पठत। |
| त्वं हसत। | त्वं हस। |
| स: मम भ्राता असि। | स: मम भ्राता अस्ति। |
| स: मम भगिनी अस्ति। | सा मम भगिनी अस्ति। |
| अहं तव नामं जानामि। | अहं तव नाम जानामि। |
| अहं तव कार्यं जानीम:। | अहं तव कार्यं जानामि। |
| सुधा रामं पत्रं लिखति। | सुधा रामाय पत्रं लिखति। |
| रमा रामाय पत्रं लिखामि। | रमा रामाय पत्रं लिखति। |
| पर्वता: रम्याणि सन्ति। | पर्वता: रम्या: सन्ति। |
| वृक्षाणि रम्या: सन्ति। | वृक्षा: रम्या: सन्ति। |
| ते मम मित्राणि अस्ति। | ते मम मित्राणि सन्ति। |
| अत्रभवान् काश्यप: आयान्ति। | अत्रभवान् काश्यप: आयाति। |
| ते कन्ये पठति। | ता: कन्या: पठन्ति। |
| ते परधनं न चोरयति। | ते परधनं न चोरयन्ति। |
| इदं कार्यं कठिन: अस्ति। | इदं कार्यं कठिनम् अस्ति। |
| स: विद्यालये द्वितीयम् आसीत्। | स: विद्यालये द्वितीय: आसीत्। |
| ते कक्षायां प्रथमम् अतिष्ठन्। | स: कक्षायां प्रथम: अतिष्ठत्। |
| मह्यं दुग्धं न रोचे। | मह्यं दुग्धं न रोचते। |
| त्वं प्रतिदिनं पठति। | त्वं प्रतिदिनं पठसि। |
| अहं च ते च हसन्ति। | अहं च ते च हसाम:। |
| वयं वृक्षात् पश्यन्ति। | वयं वृक्षात् पश्याम:। |
| भवान् कुत्र गच्छामि? | भवान् कुत्र गच्छति? |
| नद्य: प्रवहति। | नद्य: प्रवहन्ति। |
| मृग: प्रतिदिनं शस्यम् अखादन्। | मृग: प्रतिदिनं शस्यम् अखादत्। |
| ते श्व: पाठम् स्मरन्ति। | ते श्व: पाठं स्मरिष्यन्ति। |
| माता ह्य: गतवान्। | माता ह्य: गतवती। |

# रचनात्मकं कार्यम्

(Composition Work)

## पत्र-लेखनम्

अयं कालः संचारक्षेत्रे समृद्धकालः अस्ति। विचाराणाम् आदानप्रदानार्थं बहूनि संचारसाधनानि सन्ति परम् अद्यापि पत्रं विचारसम्प्रेषणस्य प्रमुखं साधनं वर्तते। पत्रस्य महत्त्वम् अनेन ज्ञातुं शक्यते यत् अस्मिन् संचारसमृद्धकालेऽपि कार्यालय-सम्बन्धि-सूचनानाम् आदान-प्रदानं पत्रमाध्यमेन एव अधिकं भवति।

पत्रमाध्यमेन वयं विविध-वार्ताः, वैयक्तिकविचारान्, चिन्तनानि, संवेदनाः, अनुभूतिं च प्रकटयितुं शक्नुमः। व्यापारक्षेत्रे, कार्यालयानां कार्यसंदर्भे च वयं पत्राणाम् एव प्रयोगं कुर्मः। अतएव अस्मिन् युगेऽपि पत्रलेखनस्य विशिष्टं महत्त्वं वर्तते। पत्रं द्विविधं भवति — १. औपचारिक-पत्रम् २. अनौपचारिक-पत्रम्

औपचारिकपत्रान्तर्गतं सर्वकारकार्यालयैः व्यावसायिकसंस्थाभिः च कृतः पत्रव्यवहारः आयाति। शुभकामनापत्रं, निमन्त्रणपत्रं, शोकसंवेदनापत्रं, समस्यामूलकपत्रम् इत्यादीनि पत्राणि अपि औपचारिकपत्राणि एव कथ्यन्ते।

अनौपचारिकपत्रस्य अपरनाम व्यक्तिगतपत्रमपि भवति। स्वात्मीयजनानां कृते यत् पत्रं लिख्यते तत् अनौपचारिकपत्रं, व्यक्तिगतपत्रं वा कथ्यते।

अत्र अभ्यासार्थं कानिचन पत्राणि दीयन्ते। छात्राः तानि पठित्वा पत्रलेखनस्य अभ्यासं कुर्युः।

## अनौपचारिक-पत्राणि

### ( १ ) पित्रे पत्रम्

जयपुरतः

दिनाङ्कः ११.०३.२०१६

श्रद्धेयेषु पितृचरणेषु,

सादरं प्रणामाः।

अत्रकुशलं तत्रास्तु। भवदीयं स्नेहापूरितं पत्रम् अद्यैव अहं प्राप्तवान्। सम्पूर्णं वृत्तं च ज्ञातवान्। अधुना मम वार्षिकी परीक्षा प्रचलति। परीक्षायाम् इदानीं यावत् सर्वाणि प्रश्नपत्राणि सम्यक् अभवन्। शेषविषयाणां स्थितिः अपि समीचीना वर्तते। आशासे यत् परीक्षायाम् उत्तमान् अङ्कान् प्राप्य कक्षायां श्रेष्ठस्थानं प्राप्स्यामि।

परीक्षानन्तरं शीघ्रमेव गृहम् आगमिष्यामि। पूजनीयेषु मातृचरणेषु मम प्रणाम: कथनीय:। अनुजाय आशिष:।

भवदाज्ञाकारी पुत्र:
राकेश:

## ( २ ) अनुजाय पत्रम्

बीकानेरत:
संस्कृत-दिवस:
दिनाङ्क: १८.०८.२०१६

प्रिय अनुज प्रवीण!

शुभाशीर्वादा:।

अत्र कुशलं तत्रास्तु। तव पत्रम् अद्य एव मया प्राप्तम्। पत्रं पठित्वा सर्वं वृत्तं ज्ञातं, प्रसन्नता च संजाता। त्वं संस्कृतविद्यालये आयोजिते संस्कृतसम्भाषणशिविरे भागं गृहीतवान्। एकमासस्य अभ्यासानन्तरम् अधुना त्वं संस्कृतसम्भाषणे प्रवीण: अभव: इति अस्माकं कृते प्रसन्नताया: विषय: वर्तते। पित्रा उक्तं यत् यदि योग्यताभिवृद्ध्यर्थं एतादृशा: अन्ये अपि कार्यक्रमा: आयोज्यन्ते तर्हि तेषु त्वया पूर्णोत्साहेन भाग: गृहीतव्य:। अध्ययने अपि अवधानं दातव्यम्।

शेषं सर्वं कुशलम्। समये-समये च स्वाध्ययनस्थिति-विषये अवबोधय।

त्वदीय: शुभाकांक्षी
सुरेश:

## ( ३ ) मित्राय पत्रम्

अजयमेरुत:
दिनाङ्क: ०८.०५.२०१६

प्रियमित्र दीपक!

नमस्ते!

अत्र अहं कुशल:, भवत: कुशलतां कामये। अहं मातापितृभ्यां सह अस्मिन् ग्रीष्मावकाशसमये भ्रमणार्थं हिमाचलप्रदेशं गमिष्यामि। भवान् अपि अस्माभि: सह तत्र चलतु इति मम प्रबलेच्छा अस्ति। वयं सर्वे तत्र मिलित्वा आनन्दानुभवं करिष्याम:। मदीय: अयं प्रस्ताव: भवते रोचते चेत्, ज्ञापयतु।

परिवारे पूज्येभ्यो सर्वेभ्यो जनेभ्यो मम सादरप्रणाम: निवेदनीय:। पत्रस्योत्तरं शीघ्रमेव प्रेषणीयम्।

भवत: मित्रम्
सोहन:

## प्रार्थना-पत्राणि

**१. भवान् दशम्याः कक्षायाः छात्रः महेन्द्रः अस्ति। स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णतावकाशार्थं प्रार्थनापत्रं लिखतु।**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः

राजकीयः आदर्श-उच्चमाध्यमिक-विद्यालयः,

जयपुरम् (राज.)

विषयः - दिनद्वयस्य रुग्णतावकाशार्थं प्रार्थनापत्रम्।

महोदयाः!

उपर्युक्तविषयान्तर्गते निवेदनम् अस्ति यत् अहं गतदिवसात् अतीव रुग्णोऽस्मि। अतः अहं विद्यालयम् आगन्तुं समर्थः नास्मि।

प्रार्थना अस्ति यत् १३.३.२०१६ तः १४.३.२०१६ दिनाङ्कपर्यन्तं दिनद्वयस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति।

दिनाङ्कः — भवताम् आज्ञाकारी शिष्यः

१३.०३.२०१६ — महेन्द्रः

कक्षा-दशमी

**२. आत्मानं दशम्याः कक्षायाः योगेशं मत्वा स्वविद्यालयस्य प्रधानाचार्याय पार्श्वस्थे विद्यालये आयोज्यमानासु क्रीडाप्रतियोगितासु धावन-प्रतिस्पर्धायां भागं ग्रहीतुं प्रार्थनापत्रं लिखतु।**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः,

राजकीय-माध्यमिक-विद्यालयः,

कोटड़ा, उदयपुरम्

विषयः - धावनप्रतियोगितायां भाग-ग्रहणम्।

महोदयाः!

उपर्युक्तविषयान्तर्गतं सविनयं निवेदनम् अस्ति यत् राजकीय-आदर्श-उच्चमाध्यमिक-विद्यालये (कोटड़ा इत्यत्र) २३.९.२०१६ तः २५.९.२०१६ दिनाङ्कपर्यन्तं क्रीडाप्रतियोगिताः आयोजिताः भविष्यन्ति।

अहमपि तत्र धावनप्रतियोगितायां भागदिनाङ्कः ग्रहीतुम् इच्छामि। अतः निवेदनम् अस्ति यत् भवन्तः मां क्रीडाप्रतियोगितायां भागं ग्रहीतुम् अनुमतिं प्रदाय अनुग्रहीष्यन्ति।

भवताम् आज्ञाकारी शिष्यः

दिनाङ्कः — योगेशः

२०.०९.२०१६ — कक्षा-दशमी

## संकेताधारितं संवादलेखनम्

( १ )

**मञ्जूषातः उपयुक्तपदानि गृहीत्वा पुत्रस्य अध्ययनविषये पितापुत्रयोः संवादं पूरयतु —**

| |
|---|
| **अध्यापकः विषये गणिते व्यवस्थां स्थानान्तरणम् अध्ययनं समीचीनं काठिन्यम्** |

पिता – रमेश! तव .................. कथं प्रचलति?

रमेशः – हे पितः! अध्ययनं तु .................. प्रचलति।

पिता – कोऽपि विषयः एतादृशः अस्ति यस्मिन् त्वं .................. अनुभवसि?

रमेशः – आम्! .................. मम स्थितिः सम्यक् नास्ति। यतोहि अस्माकं विद्यालये इदानीं गणितस्य .................. नास्ति।

पिता – त्वं पूर्वं तु माम् अस्मिन् .................. न उक्तवान्!

रमेशः – पूर्वं तु अध्यापक-महोदयः आसीत् परं एकमासात् पूर्वमेव तस्य .................. अन्यत्र अभवत्।

पिता – अस्तु। अहं तव कृते गृहे एव गणिताध्यापकस्य .................. करिष्यामि।

रमेशः – धन्यवादाः।

### उदाहरणार्थ-समाधानम् :-

पिता – रमेश! तव **अध्ययनं** कथं प्रचलति?

रमेशः – हे पितः! अध्ययनं तु **समीचीनं** प्रचलति।

पिता – कोऽपि विषयः एतादृशः अस्ति यस्मिन् त्वं **काठिन्यम्** अनुभवसि?

रमेशः – आम्! **गणिते** मम स्थितिः सम्यक् नास्ति। यतोहि अस्माकं विद्यालये इदानीं गणितस्य **अध्यापकः** नास्ति।

पिता – त्वं पूर्वं तु माम् अस्मिन् **विषये** न उक्तवान्!

रमेशः – पूर्वं तु अध्यापक-महोदयः आसीत् परं एकमासात् पूर्वमेव तस्य **स्थानान्तरणम्** अन्यत्र अभवत्।

पिता – अस्तु। अहं तव कृते गृहे एव गणिताध्यापकस्य **व्यवस्थां** करिष्यामि।

रमेशः – धन्यवादाः।

**( २ )**

**मञ्जूषायां प्रदत्तपदैः 'जयपुरभ्रमणम्' इति विषये मित्रयोः परस्परं वार्तालापं पूरयतु।**

| मित्रैः | जयपुरं | कार्यक्रमः | दर्शनीयम् | भ्रमणार्थम् | यात्रानुभवविषये | द्रक्ष्यामः |
|---|---|---|---|---|---|---|

विनोदः – अंकित! श्वः भवान् कुत्र गमिष्यति?

अंकितः – अहं .................. गमिष्यामि।

विनोदः – तत्र किमपि कार्यं वर्तते? अथवा .................. एव गच्छति?

अंकितः – कार्यं नास्ति, अहं तु .................. सह भ्रमणार्थं गच्छामि।

विनोदः – जयपुरे कुत्र-कुत्र भ्रमणस्य .................. अस्ति?

अंकितः – वयं तत्र आमेर-दुर्गं, जयगढ़दुर्गं, गोविन्ददेव-मन्दिरं च ..................।

विनोदः – तत्र नाहरगढ़-दुर्गमपि पश्यतु। तदपि .................. अस्ति।

अंकितः – यदि समयः अवशिष्टः भविष्यति तर्हि निश्चयेन तत्र गमिष्यामः।

विनोदः – बाढ़म्। मित्र! नमस्ते! इदानीम् अहं गच्छामि। सोमवासरे आवां पुनः मेलिष्यावः। तदा .................. वार्तालापं करिष्यावः।

**( ३ )**

**मञ्जूषायाः उपयुक्तपदानि गृहीत्वा गुरुशिष्ययोः मध्ये क्रीडायाः विषये संवादं पूरयत।**

| अध्ययनम् | क्रीडने | बहुलाभम् | आवश्यकता | अधुना | करोषि | क्रीडाङ्गणे | क्रीडायै |
|---|---|---|---|---|---|---|---|

अध्यापकः – प्रवीण! त्वम् अत्र किं .................. ?

प्रवीणः – हे गुरो! अहम् .................. किमपि न करोमि।

अध्यापकः – तर्हि गच्छ। तव मित्राणि तत्र .................. क्रीडन्ति, तैः सह क्रीड।

प्रवीणः – मम .................. रुचिः नास्ति। अतः अहं न क्रीडामि।

अध्यापकः – स्वस्थशरीरस्य स्वस्थमनसः च कृते क्रीडायाः अस्माकं जीवने महती .................. भवति।

प्रवीणः – यदि अहं क्रीडायां ध्यानं दास्यामि तर्हि मम .................. बाधितं भविष्यति।

अध्यापकः – एतद् समीचीनं नास्ति। क्रीडायै स्वल्पसमयम् एव प्रयच्छ। अल्पसमयः अपि शरीराय .................. प्रदास्यति।

प्रवीणः – बाढ़म् श्रीमन्! इतः आरभ्य अहं कञ्चित् समयं .................. अपि दास्यामि।

(४)

**मञ्जूषायां प्रदत्तशब्दानां सहायतया मातापुत्रयोः मध्ये वार्तालापं पूरयतु।**

| वस्तूनि | आपणं | सायंकाले | विद्यालयस्य | मातुलः | भोजनं | त्वं |
|---|---|---|---|---|---|---|

माता – राघव! .................. किं करोषि?

राघवः – अहं मम .................. गृहकार्यं करोमि।

माता – पुत्र! गृहकार्यानन्तरम् .................. गत्वा ततः दुग्धं शाकफलानि च आनय।

राघवः – अहं .................. पुस्तकं क्रेतुम् आपणं गमिष्यामि तदा दुग्धं शाकफलानि च आनेष्यामि।

माता – सायंकाले न, त्वं तु पूर्वमेव गत्वा आनय।

राघवः – शीघ्रं किमर्थम्?

माता – अद्य तव .................. आगमिष्यति, अतः .................. समयात् पूर्वमेव पक्ष्यामि।

राघवः – मातुलः आगमिष्यति चेत् अहम् इदानीम् एव गत्वा .................. क्रीत्वा आगच्छामि।

## अनुवाद-कार्यम्

**एतदर्थम् अस्मिन्नेव पुस्तके व्याकरण-भागे कारकं-वाच्यपरिवर्तनम्-अशुद्धिशोधनम् इति प्रकरण-त्रये अभ्यासः करणीयः।**

# चित्राधारितं वर्णनम्

(१)

**निम्नाङ्कितं चित्रं दृष्ट्वा प्रदत्तसंकेतपदानां साहाय्येन स्वविद्यालयस्य विषये सप्तवाक्यानि लिखतु।**

ग्रामस्य मध्ये    विंशतिः कक्षाः
षोडश अध्यापकाः    उद्यानम्
क्रीडाङ्गणम्    मध्यान्तरे
क्रीडन्ति    अतीवसुन्दरः




(२)

**चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया 'अस्माकं जीवने वृक्षाणाम् उपयोगिता' इति विषये सप्तवाक्यानि लिखतु।**

अस्मिन् युगे    उपयोगिता प्राणवायुं
पर्यावरणं    दृश्यते    फलानि
प्राप्नुमः    छाया    काष्ठानि
खगाः    वृक्षाणां कर्तनं नैव



(३)

**निम्नाङ्कितं चित्रं दृष्ट्वा प्रदत्तसंकेतपदैः सप्तवाक्यानि लिखत।**

राजमार्गस्य चित्रम्    वाहनानि
शीघ्रं गृहं    भारयुक्तवस्तूनि
प्रेषयितुं शक्नुवन्ति    दुर्घटनाः
सावधानेन    चालयामः    सम्भावनाः



(४)

**चित्रं दृष्ट्वा निम्नलिखितशब्दानां सहायतया सङ्गणकस्य विषये पञ्चवाक्यानि लिखत।**

सङ्गणकस्य    कार्यालये    कार्याणि
सम्पूर्णाः सूचनाः    कर्गदानां प्रयोगः
सङ्गणकज्ञानम्    महती आवश्यकता



## कथाक्रमस्य संयोजनम्

संस्कृतकथासाहित्यमतीव समृद्धम् अस्ति। अत्र नैकानां नीतिकथानां महान् संग्रहो वर्तते। तासु काश्चित्-प्रसिद्धाः कथाः अत्र क्रमरहितवाक्येषु अतिसंक्षिप्ततया लिखिताः। तानि कथा-वाक्यानि क्रमेण योजयित्वा कथाक्रमसंयोजनस्य पाठ्यक्रमानुरोधात् रचनात्मक-कौशल-विकासाय अभ्यासः करणीयः।

### (१)

### क्रमरहितवाक्येषु कथा

(१) घटे जलम् अल्पम् आसीत्।
(२) तस्य मस्तिष्के एकः विचारः समागतः।
(३) एकः पिपासितः काकः आसीत्।
(४) सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम्।
(५) सः वने एकं घटम् अपश्यत्।
(६) जलं पीत्वा काकः ततः अगच्छत्।

### कथाक्रम-संयोजनम्

(१) एकः पिपासितः काकः आसीत्।
(२) सः वने एकं घटम् अपश्यत्।
(३) घटे जलम् अल्पम् आसीत्।
(४) तस्य मस्तिष्के एकः विचारः समागतः।
(५) सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम्।
(६) जलं पीत्वा काकः ततः अगच्छत्।

### (२)

### क्रमरहितकथावाक्यानि

(१) मूषकः परिश्रमेण जालम् अकृन्तत्।
(२) एकदा सः जाले बद्धः।
(३) सिंहः जालात्-मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।
(४) एकस्मिन् वने एकः सिंहः वसति स्म।
(५) सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।
(६) तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत्।

### क्रम-संयोजनम्

(१) एकस्मिन् वने एकः सिंहः वसति स्म।
(२) एकदा सः जाले बद्धः।

(३) सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।
(४) तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत्।
(५) मूषकः परिश्रमेण जालम् अकृन्तत्।
(६) सिंहः जालात् मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।

## (३)

### क्रमरहितकथावाक्यानि

(१) तदा तस्य मुखस्था रोटिका अपि जले पतति।
(२) एकदा कश्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।
(३) तदाः सः नदीजले स्वप्रतिबिम्बम् अपश्यत्।
(४) सः कुक्कुरः रोटिकां प्राप्तुं तेन सह युद्धार्थं मुखम् उद्घाटयति।
(५) सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।
(६) स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।
(७) अत एव कथ्यते 'लोभः न करणीयः।'

### कथाक्रमस्य संयोजनम्

(१) एकदा कश्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।
(२) सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।
(३) तदा सः नदीजले स्वप्रतिबिम्बम् अपश्यत्।
(४) स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।
(५) सः कुक्कुरः रोटिकां प्राप्तुं तेन सह युद्धार्थं मुखम् उद्घाटयति।
(६) तदा तस्य मुखस्था रोटिका अपि जले पतति।
(७) अत एव कथ्यते 'लोभः न करणीयः।'

## (४)

### क्रमरहितकथावाक्यानि

(१) एकः बुभुक्षितः श‍ृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।
(२) लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।
(३) परं तथापि द्राक्षाफलानि न प्राप्नोत्।
(४) एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।
(५) ''एतानि द्राक्षाफलानि अम्लानि'' इति उक्त्वा कुपितः श‍ृगालः ततः गतः।
(६) तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।

### कथाक्रमस्य संयोजनम्

(१) एक: बुभुक्षित: शृगाल: भोजनार्थं वने इतस्तत: भ्रमति स्म।
(२) एकस्मिन् स्थाने स: द्राक्षालतां पश्यति।
(३) लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।
(४) तानि खादितुं स: नैकवारं प्रयासम् अकरोत्।
(५) परं तथापि द्राक्षाफलानि न प्राप्नोत्।
(६) ''एतानि द्राक्षाफलानि अम्लानि'' इति उक्त्वा कुपित: शृगाल: तत: गत:।

### (५)

### क्रमरहितकथावाक्यानि

(१) स: प्रतिदिनं बहून् पशून् हत्वा खादति स्म।
(२) एकदा यदा शशकस्य क्रम: आगत:, तस्य विलम्बागमनेन सिंह: कुपित: जात:।
(३) सिंह: जले स्वप्रतिबिम्बं दृष्ट्वा तस्मिन् कूपे अकूर्दत्।
(४) कस्मिंश्चित् वने एक: सिंह: वसति स्म।
(५) तदा सर्वे पशव: विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे भोजनार्थम् एकं पशुं प्रेषयितुं निश्चितवन्त:।
(६) तदा चतुर: शशक: सिंहं कूपस्य समीपम् अनयत्।
(७) अत: लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति।

### कथाक्रमस्य संयोजनम्

(१) कस्मिंश्चित् वने एक: सिंह वसति स्म।
(२) स: प्रतिदिनं बहून पशून् हत्वा खादति स्म।
(३) तदा सर्वे पशव: विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे भोजनार्थम् एकं पशुं प्रेषयितुं निश्चितवन्त:।
(४) एकदा यदा शशकस्य क्रम: आगत:, तस्य विलम्बागमनेन सिंह: कुपित: जात:।
(५) तदा चतुर: शशक: सिंहं कूपस्य समीपम् अनयत्।
(६) सिंह: जले स्वप्रतिबिम्बं दृष्ट्वा तस्मिन् कूपे अकूर्दत्।
(७) अत: लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति।